## ५ – अदादिगणे अजन्तधातवः

अदादिगणे ७२ धातवः सन्ति | यथा सर्वेषु गणेषु, कर्त्रर्थके सार्वधातुकप्रत्यये परे, **कर्तरि शप्** (३.१.६८) इत्यनेन शप् विहितः अस्ति | तदा **अदिप्रभृतिभ्यः शपः** (२.४.७२) इत्यनेन शपः लुक् (लोपः) भवति | स्थितस्य शप्–प्रत्ययस्य लुक्, अतः व्यावहारिकत्वेन अदादिगणे कोऽपि विकरणप्रत्ययः नास्ति |

**अदिप्रभृतिभ्यः शपः** (२.४.७२) = अदादिगणे स्थितेभ्यः धातुभ्यः विहितस्य शप्–प्रत्ययस्य लुक् (लोपः) भवति | अदिः प्रभृतिः (आदिः) येषां ते अदिप्रभृतयः बहुव्रीहिः, तेभ्यः अदिप्रभृतिभ्यः | अदिप्रभृतिभ्यः पञ्चम्यन्तं, शपः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **ण्यक्षत्रियार्षञितो यूनि लुगणिञोः** (२.४.५८) इत्यस्मात् **लुक्** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अदिप्रभृतिभ्यः शपः लुक्** |

१. अत्र प्रश्नः उदेति यत् लोप–लुक् इत्यनयोः भेदः कः ? द्वाभ्यां प्रत्ययस्य अपगमनम् | लोपः इत्युक्ते प्रत्ययः गतः, परन्तु अनुपस्थितौ अपि कार्यं कर्तुम् अर्हति | एतदर्थं सूत्रम् अस्ति **प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२); अनेन प्रत्ययस्य लोपे सत्यपि लुप्तप्रत्ययस्य लक्षणम् अस्त्येव | "लक्षणम् अस्ति" इत्युक्ते लुप्त–प्रत्ययः यद्यपि न दृश्यते, परन्तु तस्य प्रभावम् अनुसृत्य यत् किमपि कार्यं प्रसक्तम् अस्ति, तत् कार्यं भवति |

**प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) = प्रत्यये लुप्ते सति, प्रत्ययं मत्वा तस्य द्वारा विहितं कार्यं स्यात् | प्रत्ययस्य लोपः प्रत्ययलोपः षष्ठीतत्पुरुषः, तस्मिन् प्रत्ययलोपे | प्रत्ययस्य लक्षणं निमित्तं यस्य तत् प्रत्ययलक्षणम्, बहुव्रीहिः | सूत्रं स्वयं सम्पूर्णम्— **प्रत्ययलोपे प्रत्ययलक्षणम्** |

तर्हि प्रत्यये लुप्ते तदाश्रितं कार्यं भवति | लुक् न तथा; प्रत्ययस्य लुक् भवति चेत् न केवलं प्रत्ययः गच्छति, अपि तु तदाश्रितं कार्यमपि न स्यात् | तद्विधायकं सूत्रम् अस्ति **न लुमताऽङ्गस्य** (१.१.६३) |

**न लुमताऽङ्गस्य** (१.१.६३) = यस्मिन् शब्दे 'लु' अस्ति, तेन शब्देन प्रत्ययादर्शनं विहितं चेत्, सः प्रत्ययः अङ्गकार्यस्य निमित्तं न स्यात् | लुः अस्य अस्ति इति लुमान्, तेन लुमता | न अव्ययपदं, लुमता तृतीयान्तम्, अङ्गस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) इत्यस्य पूर्णतया अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **लुमता प्रत्ययलोपे अङ्गस्य प्रत्ययलक्षणं न** |

अस्मिन् सूत्रे लुमता, लुमत् इति प्रातिपदिकस्य तृतीयाविभक्त्यन्तं रूपम् | इदं मतुप्–प्रत्ययान्तं; प्रथमाविभक्तौ लुमान् | मतुप्–प्रत्ययस्य अर्थः अस्य अस्मिन् वा; यथा बुद्धिमान् इत्युक्ते बुद्धिः अस्य अस्मिन् वा, सः बुद्धिमान् | तर्हि 'लु' अस्य अस्मिन् वा, सः लुमान् | व्याकरणे त्रयः लुमन्तः सन्ति— लुक्, श्लु, लुप् चेति | इदं सूत्रं वक्ति यत् येन अदर्शनं भवति, सः लुमान् अस्ति चेत्, तर्हि प्रत्ययलोपे प्रत्ययलक्षणं न भवति | अनुवृत्ति–सहितसूत्रं तथैव— **(यदा) लुमता प्रत्ययलोपे (तदा) अङ्गस्य प्रत्ययलक्षणं न** | अतः **न लुमताऽङ्गस्य** (१.१.६३) इति सूत्रं **प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) इत्यस्य बाधकसूत्रम् | तर्हि अत्र सारांशः एवं यत् लुक् इत्यनेन कस्यचित् प्रत्ययस्य अदर्शनं भवति चेत्, यस्मात् अङ्गात् सः प्रत्ययः लुप्तः जातः, तस्मिन् अङ्गे सः लुप्तप्रत्ययः तदानीम् अङ्गकार्यस्य निमित्तं न भवितुम् अर्हति |

आहत्य लोपप्रकरणे चत्वारि सूत्राणि | क्रमेण—

**अदर्शनं लोपः** (१.१.६०) = लोप–संज्ञया अदर्शनं विहितम् |
**प्रत्ययस्य लुक्श्लुलुपः** (१.१.६१) = लुक्, श्लु, लुप् इत्याभिः तिसृभिः संज्ञाभिः अदर्शनं विहितम् |
**प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) = प्रत्यये लुप्ते तदाश्रितं कार्यं स्यात् |
**न लुमताऽङ्गस्य** (१.१.६३) = लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् |

अदादिगणे विकरणप्रत्ययः शप् आसीत्, अनन्तरं तस्य लुक् अभवत् | लुमता शपः अदर्शनं जातम्, अतः धात्वङ्गे शप्–निमित्तकम् अङ्गकार्यं नार्हम् |

अधुना नूतनबिन्दुः—यद्यपि शपः लुक् जातम् अतः शप्–निमित्तकम् अङ्गकार्यं निषिद्धं, परन्तु कुत्रचित् लुक्–निमित्तं विशिष्टकार्यं सञ्जायते | यत्र लुकः सङ्केतः सूत्रेषु भवति तत्र एतादृशं कार्यम् "अदादिगणे" भवति इति बोध्यम् | यथा— **उतो वृद्धिर्लुकि हलि** (७.३.८९) इति सूत्रं द्रक्ष्यामः | लुकः विषये, हलादि पिति उदन्ताङ्गस्य वृद्धिः (पित् परे अस्ति अतः गुणः भवति स्म, परन्तु गुणं प्रबाध्य वृद्धिः) | अस्मिन् सूत्रे

'लुक्' अस्ति, अतः अदादिगणे तस्य प्रसक्तिः | यथा, यु + ति → य् + औ + ति → यौति | अन्यत्र—यत्र शपः लोपः जातः किन्तु लुक् इत्यनेन न—तत्र अस्य सूत्रस्य प्रसक्तिः न भवति | तर्हि सारांशः अत्र यत् अदादिगणे कोऽपि विकरणप्रत्ययः न दृश्यते, परन्तु विकरणप्रत्ययस्य यया रीत्या अदर्शनं कृतं, तया विशिष्टकार्यम् अपि भवति—यथा अत्र वृद्धिः |

२. अदादिगणे विकरणप्रत्ययः न दृश्यते अतः धातोः साक्षात् परे तिङ्प्रत्ययाः विहिताः भवन्ति | यथा पा + ति → पाति | प्रथमवारम् अस्माभिः एतादृशी गतिः अवलोकिता | एतावता धातुः कुत्रापि तिङ्प्रत्ययेन न प्रभावितः | भ्वादिगणे, दिवादिगणे, तुदादिगणे, स्वादिगणे, तनादिगणे, क्र्यादिगणे च धात्वङ्गे अङ्गकार्यस्य निमित्तं विकरणप्रत्ययः एव | परन्तु अदादौ न तथा | यथा इण्–धातुः, इ + ति → एति; इ + तः → इतः | सारांशः एवं यत् अदादौ धातोः अङ्गकार्यं साक्षात् तिङ्प्रत्ययेन | तिङ्प्रत्ययाः परिवर्तन्ते, अतः अङ्गकार्यमपि परिवर्तते |

३. वयं जानीमः यत् दश धातुगणाः विभक्ताः तिङ्प्रत्यय–निमित्तकस्य अङ्गस्य अन्तिमवर्णस्य अनुसारम् | येषु धातुगणेषु अङ्गम् अदन्तं भवति, ते धातुगणाः प्रथमगणसमूहे वर्तन्ते | येषु धातुगणेषु अङ्गम् अनदन्तं भवति, ते धातुगणाः द्वितीयगणसमूहे वर्तन्ते | तर्हि अत्र प्रश्नः उदेति यत् अदादिगणः कस्मिन् गणसमूहे अस्ति अपि च किमर्थम् ? सामान्यतया धातुगणेषु विकरणप्रत्ययाः सन्ति; तत्र विकरणप्रत्ययस्य अन्तिमवर्णः एव अङ्गस्य अन्तिमवर्णः | यथा भ्वादौ शप् इति विकरणप्रत्ययः; भू–धातोः भव इत्यङ्गम्; अङ्गस्य अन्तिमवर्णः ह्रस्व–अकारः (शपः एव अन्तिमवर्णः) | अतः अङ्गम् अदन्तम् | स्वादौ श्नु इति विकरणप्रत्ययः; चि–धातोः चिनु इत्यङ्गम्; अङ्गस्य अन्तिमवर्णः उकारः (श्नोः एव अन्तिमवर्णः) | अतः अङ्गम् अनदन्तम् | अधुना अदादौ कथं भवति ? विकरणप्रत्ययस्तु नास्त्येव; तर्हि केन आधारेण अङ्गं ज्ञायते ? अङ्गम् अदन्तं वा अनदन्तं वा इत्यत्र कथं निर्णीयते ? उत्तरं तु अस्माभिः प्रायः बुद्धमेव | अदादौ धातुरेव अङ्गम् अतः धातोः यः अन्तिमवर्णः, स एव अङ्गस्यापि | अदादौ अस्–धातुः सकारान्तः (अतः अङ्गमपि सकारान्तं), पा–धातुः आकारान्तः (अतः अङ्गमपि आकारान्तं), यु–धातुः उकारान्तः (अतः अङ्गमपि उकारान्तम्) | अदादौ यथा धातुः तथा अङ्गम् | अपि च अदादौ अकारान्तधातवः न सन्त्येव, अतः सर्वाणि अङ्गानि अनदन्तानि | अत एव अदादिगणः द्वितीयगणसमूहे वर्तते |

४. तिङन्तपदानां सिद्ध्यर्थम् अदादिगणः वर्गद्वये विभक्तः—अजन्तधातवः हलन्तधातवः च | अधुना अजन्तधातूनां तिङन्तरूपाणि साधयाम | अदादिगणे हलन्तधातूनां कृते प्रथमतया हल्–सन्धिः पठनीयः | साधारणभाषाज्ञानार्थं यः हल्–सन्धिः, सः तु न; पदस्य व्युत्पत्त्यर्थं हल्–सन्धिः | अस्माकं पाठे अपरेषु गणेषु हलन्तधातवः आसन्, परन्तु एतावता धातु–तिङ्प्रत्यययोः मध्ये विकरणप्रत्ययः भवति स्म, अपि च विकरणप्रत्ययाः सर्वे अजन्ताः सन्ति अतः अङ्ग–तिङ्प्रत्यययोः संयोजने हल्–हल् इत्यनयोः मेलनं न जातम् | हल्–सन्धेः च अवसरः न जातः | दिवादिगणे (य), स्वादिगणे (नु), क्र्यादिगणे (ना) च विकरणप्रत्ययः स्वयं हलादिः अतः हलन्तधातु–हलादिविकरणयोः संयोजनं तु भवति, परन्तु तत्र केवलं मेलनं भवति | इत्युक्ते तत्र हल्–हल् इत्यनयोः संयोजने विकारः न भवति अतः केवलं मेलनं न तु सन्धिः |

अदादिगणे यथा वच्–धातुः अस्ति, तत्र साक्षात् परे ति आयाति वच् + ति → वक्ति | अत्र चकारः ककारः जातः, विषयः च हल्–सन्धिः इति | जुहोत्यादिगणे रुधादिगणे चापि तादृशः हल्–सन्धेः विषयः आयाति, अतः प्रथमम् अदादिगणस्य अजन्तधातवः अस्माभिः करिष्यन्ते, तदा जुहोत्यादिगणस्य अजन्तधातवः | परं हल्–सन्धिः इति विषयः परिशीलनीयः | अनन्तरम् अदादिगणस्य, जुहोत्यादिगणस्य, रुधादिगणस्य च हलन्तधातवः अवलोकनीयाः | (रुधादिगणे अजन्तधातवः न सन्त्येव |)

पूर्वमेव अस्माभिः ज्ञातं यत् सार्वधातुकलकारेषु क्रियापदस्य निर्माणार्थं त्रीणि सोपानानि सन्ति—
१. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्, तदा धातु–विकरणप्रत्यययोः मेलनम्
२. तिङ्प्रत्यय–सिद्धिः
३. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनम्

१. <u>विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्, तदा धातु–विकरणप्रत्यययोः मेलनम्</u>

कुत्रापि किमपि कार्यं नास्ति यतः शप्–विकरणप्रत्ययस्य लुक् भवति अतः शप् न दृश्यते न वा अङ्गकार्यस्य निमित्तं भवति |

२. <u>तिङ्प्रत्यय–सिद्धिः</u>

अदादिगणे अङ्गम् अनदन्तम्, अतः अनदन्ताङ्गानां कृते सिद्ध–तिङ्प्रत्ययाः भवन्ति | धातुद्वयस्य (दरिद्रा, जागृ) कृते विशेषकार्यं वर्तते | अस्मिन् पाठे यत्र तयोः विवरणम् अस्ति, तत्रैव इदं कार्यं प्रदर्शयिष्यते | तौ द्वौ विहाय यत्र अङ्गम् अनदन्तं, तत्र यथा सर्वेषां धातूनां कृते

सिद्ध–तिङ्संज्ञकप्रत्यया: तथा अत्रापि | अतः अदादिगणे सिद्ध–तिङ्प्रत्ययाः एते एव—

| परस्मैपदम् | | आत्मनेपदम् |
|---|---|---|
| | लट्-लकारः | |
| **ति**, तः, अन्ति | | ते आते अते |
| **सि**, थः, थ | | से आथे ध्वे |
| **मि**, वः, मः | | ए वहे महे |
| | लोट्-लकारः | |
| **तु**, तात् ताम् अन्तु | | ताम् आताम् अताम् |
| हि, तात्, तम् त | | स्व आथाम् ध्वम् |
| **आनि आव आम** | | **ऐ आवहै आमहै** |
| | लङ्-लकारः | |
| **त्** ताम् अन् | | त आताम् अत |
| **स्** तम् त | | थाः आथाम् ध्वम् |
| **अम्** व म | | इ वहि महि |
| | विधिलिङ्-लकारः | |
| यात् याताम् युः | | ईत ईयाताम् ईरन् |
| याः यातम् यात | | ईथाः ईयाथाम् ईध्वम् |
| याम् याव याम | | ईय ईवहि ईमहि |

३. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनम्

अत्र कार्यं वर्तते, यत्र प्राप्तिः अस्ति | अष्टप्रकारकाः अजन्तधातवः सन्ति (अदादिगणे षट्, यतः अकारान्तधातवः, ऋकारान्तधातवः च न सन्ति) |

1. आकारान्तधातवः (15 = या, वा, भा, ष्णा, श्रा, द्रा, प्सा, पा, रा, ला, दा, ख्या, प्रा, मा, दरिद्रा)

A. सामान्य–आकारान्तधातवः (14 = या, वा, भा, ष्णा, श्रा, द्रा, प्सा, पा, रा, ला, दा, ख्या, प्रा, मा)

**लङः शाकटायनस्यैव** (३.४.१११) = आकारान्तात् धातोः लङि झेः जुस् आदेशः भवति शाकटायनस्य मतेन | शाकटायनः कश्चन वैयाकरणः आसीत्, पाणिनेः पूर्वम् | अनेन परस्मैपदे लङि प्रथमपुरुषबहुवचने विकल्पेन अन्, उः, इत्येतयौ तिङ्–प्रत्ययौ भवतः | लङः षष्ठ्यन्तं, शाकटायनस्य षष्ठ्यन्तम्, एव अव्ययपदं, त्रिपदमिदं सूत्रम् | **आतः** (३.४.११०) इति सूत्रस्य अनुवृत्तिः, **झेर्जुस्** (३.४.१०८) इत्यस्मात् **झेः**, **जुस्** इत्यनयोः अनुवृत्तिः | **धातोः** (३.१.९१) इत्यस्य अधिकारः, पञ्चम्यन्तम् एकपदमिदं सूत्रम्; अत्र "**आतः धातोः**" अस्मिन् सूत्रे आयाति | अनुवृत्ति–सहितसूत्रम्— **शाकटायनस्य एव (मते) लङः आतः धातोः झेः जुस्** |

**उस्यपदान्तात्** (६.१.९६) = अपदान्तात् अकारात् उसि प्रत्यये परे पूर्वपरयोः पररूपम् एकादेशः भवति; आद्गुणस्य अपवादः | अवा + उः → अव् + उः → अवुः | न पदान्तम् अपदान्तं, तस्मात् अपदान्तात् | उसि सप्तम्यन्तम्, अपदान्तात् पञ्चम्यन्तं, द्विपदमिदं सूत्रम् | **आद्गुणः** (६.१.८७) इत्यस्मात् **आत्** इत्यस्य अनुवृत्तिः | **इको यणचि** (६.१.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः; अनुवर्तते अत्र यतोहि परेषु सूत्रेष्वपि तस्य आवश्यकता | **एङि पररूपम्** (६.१.९४) इत्यस्मात् **पररूपम्** इत्यस्य अनुवृत्तिः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अपदान्तात् आत् अचि उसि एकः पूर्वपरयोः पररूपम् संहितायाम्** |

अन्यत्र सन्धिः एव भवति |

यथा वा धातुः—
वा + अन्ति **अकः सवर्णे दीर्घः** → वान्ति | अवा + अन् → अवान् |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

या, वा, भा, ष्णा, श्रा, द्रा, प्सा, पा, रा ला, दा, ख्या, प्रा, मा एतेषां धातूनां सार्वधातुलकारेषु तिङन्तरूपाणि अपि तथैव भवन्ति |

B. आत्मनेपदे गा धातुः भ्वादिगणे, परन्तु रूपाणि अदादिगणीयानि सन्ति |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

C. दरिद्रा धातुः

**जक्षित्यादयः षट्** (६.१.६) = जक्षित्यादीनां धातूनाम् अभ्यस्त-संज्ञा भवति | अदादिगणे एकः अन्तर्गणः वर्तते यस्मिन् सप्त धातवः सन्ति — जक्ष्, जागृ, दरिद्रा, चकास्, शास्, दीधीङ्, वेवीङ् च | इति-शब्देन जक्ष्-धातोः परामर्शः | इति आदिः येषां ते इत्यादयः बहुव्रीहिः | जक्ष् प्रथमान्तम्, इत्यादयः प्रथमान्तं, षट् प्रथमान्तं, त्रिपदमिदं सूत्रम् | **उभे अभ्यस्तम्** (६.१.५) इत्यस्मात् **अभ्यस्तम्** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **जक्षित्यादयः षट् अभ्यस्तम्** |

**उभे अभ्यस्तम्** (६.१.५) इति सूत्रेण यदा धातोः द्वित्वं भवति, तदा मिलित्वा द्वयोः भागयोः नाम 'अभ्यस्तं' भवति | **जक्षित्यादयः षट्** (६.१.६) इत्यनेन जक्षित्यादीनां धातूनाम् अद्वित्वे सत्यपि अभ्यस्त-संज्ञा भवति |

एषां सप्तानां धातूनां तिङन्तसिद्ध्यर्थं चत्वारि कार्याणि—

१) **अदभ्यस्तात्** (७.१.४) = अभ्यस्तसंज्ञक-धातूत्तरस्य प्रत्ययस्य आदिमावयवस्य झकारस्य स्थाने अत्-आदेशो भवति | अत् प्रथमान्तम्, अभ्यस्तात् पञ्चम्यन्तं, द्विपदमिदं सूत्रम् | **झोऽन्तः** (७.१.३) इत्यस्मात् **झः** (षष्ठ्यन्तम्) इत्यस्य अनुवृत्तिः | **आयनेयीनीयियः फढखछगां प्रत्ययादीनाम्** (७.१.२) इत्यस्मात्, वचनपरिणामं कृत्वा **प्रत्ययादेः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम् — **अभ्यस्तात् अङ्गात् प्रत्ययादेः झः अत्** |

धेयं यत् अत्-आदेशस्य तकारः **हलन्त्यम्** (१.३.३) इति सूत्रेण इत्-संज्ञकः न, यतोहि अत् तु विभक्तिसंज्ञक-झि-प्रत्ययस्य अवयवस्य आदेशः अतः **न विभक्तौ तुस्माः** (१.३.४) इत्यनेन **हलन्त्यम्** (१.३.३) बाधितम् |

**अदभ्यस्तात्** (७.१.४) इति सूत्रेण लटि लोटि च प्रथमपुरुषस्य बहुवचने झ्-स्थाने अत् आदेशः, अतः लटि झि → अति न तु अन्ति; लोटि झि → अतु न तु अन्तु |

२) **सिजभ्यस्तविदिभ्यश्च** (३.४.१०९) = ङित्–लकारस्य अवस्थायां, सिच्–प्रत्ययात्, अभ्यस्तसंज्ञकात् धातोः, विद्–धातोः च, परस्य झि–प्रत्ययस्य स्थाने जुस्–आदेशो भवति | सिच् च अभ्यस्तश्च विदिश्च तेषामितरेतरद्वन्द्वः सिजभ्यस्तविदयः, तेभ्यः सिजभ्यस्तविदिभ्यः | सिजभ्यस्तविदिभ्यः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **नित्यं ङितः** (३.४.९९) इत्यस्मात् **ङितः** इत्यस्य अनुवृत्तिः | **झेर्जुस्** (३.४.१०८) इत्यस्मात् **झेः जुस्** इत्यनयोः अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्—
**सिजभ्यस्तविदिभ्यः च ङितः लस्य झेः जुस्** |

अनेन लङि अभ्यस्तसंज्ञकधातोः परस्य झि–स्थाने जुस्–आदेशः | जुस् इत्यस्य अनुबन्धलोपे, रुत्वविसर्गौ, उः इति भवति | तर्हि आहत्य अभ्यस्तसंज्ञकः धातुः अस्ति चेत्, लङि अन्–स्थाने उः इति प्रत्ययः भवति |

३) **इद् दरिद्रस्य** (६.४.११४) = दरिद्रा–धातोः आकारस्य स्थाने इ–आदेशो भवति, हलादौ किति ङिति सार्वधातुकप्रत्यये परे | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन दरिद्रा–धातोः अन्तिमवर्णस्य आकारस्य स्थाने इकारः | इत् प्रथमान्तं, दरिद्रस्य षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) इत्यस्मात् **क्ङिति** इत्यस्य अनुवृत्तिः | **ई हल्यघोः** (६.४.११३) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः | **अत उत्सार्वधातुके** (६.४.११०) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **दरिद्रस्य अङ्गस्य इत् हलि क्ङिति सार्वधातुके** |

यथा दरिद्रा + तः → दरिद्रि + तः → दरिद्रितः | दरिद्रा + वः → दरिद्रि + वः → दरिद्रिवः |

४) **श्नाभ्यस्तयोरातः** (६.४.११२) = श्ना–प्रत्ययस्य अभ्यस्तसंज्ञकधातोः च आकारस्य लोपः भवति, किति ङिति सार्वधातुकप्रत्यये परे | श्नाश्च अभ्यस्तश्च तयोरितरेतरद्वन्द्वः श्नाभ्यस्तौ, तयोः श्नाभ्यस्तयोः | श्नाभ्यस्तयोः षष्ठ्यन्तम्, आतः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **श्नसोरल्लोपः** (६.४.१११) इत्यस्मात् **लोपः**, इत्यस्य अनुवृत्तिः | **गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) इत्यस्मात् **क्ङिति** इत्यस्य अनुवृत्तिः | **अत उत्सार्वधातुके** (६.४.११०) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य श्नाभ्यस्तयोः आतः लोपः क्ङिति सार्वधातुके** |

**श्नाभ्यस्तयोरातः** (६.४.११२) इति सूत्रेण न केवलम् अजाद्यपिति अपि तु हलाद्यपिति अपि कार्यं विहितं, किन्तु हलाद्यपित्सु परेषु **ई हल्यघोः** (६.४.११३) इत्यनेन आकारस्य लोपकार्यं प्रबाध्य आकारस्य स्थाने ई–कारादेशः विधीयते | तदा हलाद्यपित्सु **ई हल्यघोः** इत्यस्य बाधकं सूत्रम् **इद् दरिद्रस्य** (६.४.११४), येन आ–स्थाने इकारादिष्टः | आहत्य **श्नाभ्यस्तयोरातः** (६.४.११२) इत्यनेन आकारस्य लोपः केवलम् अजाद्यपित्सु भवति | अजाद्यपित्सु कार्यं भवति यथा दरिद्रा + अति → दरिद्र् + अति → दरिद्रति | दरिद्रा + अतु → दरिद्र् + अतु → दरिद्रतु |

अवशिष्ट–स्थलेषु दरिद्रा–धातोः तिङन्तरूपाणि वा–धातुवत् भवन्ति |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

2. <u>इकारान्तधातवः ईकारान्तधातवः च</u> (7 धातवः— इण्, इक्, इङ्, वी, शीङ्, दीधीङ्, वेवीङ्)

A. इण् गतौ इति धातुः

१) हलादि पित्सु = गुणः | इ + ति → एति
२) अजादि पित्सु = गुणः, अयादेशः | इ + आनि → ए + आनि → अय् + आनि → अयानि

३) हलाद्यपित्सु = **क्क्ङिति च**, गुणनिषेधः | इ + तः → इतः
४) अजाद्यपित्सु = **क्क्ङिति च**, गुणनिषेधः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यस्य प्रसक्तिः अस्ति; अनेन इयङ्-आदेशः भवति स्म | परन्तु इदं सूत्रं प्रबाध्य **इणो यण्** इत्यनेन यण्-आदेशः | इ + अन्ति → यन्ति

अजादिषु पित्सु **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्य प्रसक्तिः, तत् प्रबाध्य **इणो यण्** (६.४.८१), पुनः तत् प्रबाध्य परत्वात् **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणकार्यस्य प्राप्तिः |

अजाद्यपित्सु **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणकार्यस्य प्रसक्तिः अस्ति, परन्तु अपित्वात् **सार्वधातुकमपित्** (१.२.४) इति सूत्रेण ङिद्वत्वं; तदा **क्क्ङिति च** (१.१.५) इत्यनेन गुण-निषेधः | तदा **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ्-आदेशः, तत् प्रबाध्य **इणो यण्** (६.४.८१) इत्यनेन यणः प्राप्तिः |

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) = श्नुप्रत्ययान्ताङ्गस्य (स्वादिगणस्य अङ्गस्य यथा शक्नु, चिनु इत्यनयोः), इकारान्त-उकारान्तधातुरूपि-अङ्गस्य, भ्रू-प्रातिपदिकस्य च— एषाम् इकारस्य उकारस्य स्थाने क्रमेण इयङ् उवङ् च आदेशः भवति अजादि-प्रत्यये परे | श्नु-प्रसङ्गे **प्रत्ययग्रहणे तदन्ता ग्राह्याः** (परिभाषा #२३) इति परिभाषया तदन्तविधिः; अनेन यस्य अङ्गस्य अन्ते श्नु-प्रत्ययः स्यात्, तस्मात् इत्यर्थः | य्वोः इति विशेषणं "धातु" शब्दस्य एव यतोहि श्नुप्रत्ययान्ताङ्गम्, भ्रू प्रातिपदिकम् च उकारान्तः एव अतः तत्र इयङ् इत्यस्य प्रसक्तिः नास्ति | तर्हि 'धातु' इत्येव अवशिष्यते यस्य कृते य्वोः इति विशेषणं योग्यम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन यस्य धातोः अन्ते इकार-उकारः स्यात् इति अर्थः | श्नुश्च धातुश्च, भ्रुश्च तयोः इतरेतरद्वन्द्वः श्नुधातुभ्रुवः, तेषां श्नुधातुभ्रुवाम् | इश्च उश्च तयोः इतरेतरद्वन्द्वः यू, तयोः य्वोः | इयङ् च उवङ् च तयोः इतरेतरद्वन्द्वः, इयङुवङौ | अचि सप्तम्यन्तं, श्नुधातुभ्रुवां षष्ठ्यन्तं, य्वोः षष्ठ्यन्तम्, इयङुवङौ प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **य्वोः श्नुधातुभ्रुवाम् अङ्गानां इयङुवङौ अचि** |

**इणो यण्** (६.४.८१) = इण्-धातोः यण्-आदेशः भवति अजादिप्रत्यये परे | इणः षष्ठ्यन्तं, यण् प्रथमान्तं, द्विपदमिदं सूत्रम् | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम् — **इणः अङ्गस्य यण् अचि** |

लङि—
**आडजादीनाम्** (६.४.७२) = लङि अजादिधातुरूपि-अङ्गस्य आट्-आगमो भवति | प्रथमम् अङ्गकार्यं, तदा एव आगमः, सन्धिकार्यं च |
**आटश्च** (६.१.८९) = आडागमात् अचि परे पूर्वपरयोः वृद्धिरेकादेशो भवति |

अत्र अवधेयं यत् कार्यस्य एकः क्रमः वर्तते | तं क्रमम् आधारीकृत्य प्रक्रिया प्रवर्तनीया— १) (लङि) अडागमः आडागमः च | २) तिङ्-निमित्तम् अङ्गकार्यम् | ३) (लङि) आडागमे सति वृद्धि-कार्यम् | ४) तिङ्प्रत्यय-योजनं, तत्सम्बद्ध-सन्धिकार्यम् |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

**आडजादीनाम्** (६.४.७२) = लुङ् लङ् लृङ् च परे चेत्, अजादिधातुरूपि-अङ्गस्य आट्-आगमो भवति; स च अडागमः उदात्त-संज्ञकः | **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन अङ्गात् प्राक् आयाति | अच् आदिर्येषां ते, अजादयः बहुव्रीहिः; तेषाम् अजादीनाम् | आट् प्रथमान्तम्, अजादीनाम् षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (६.४.७१) इत्यस्मात् **लुङ्लङ्लृङ्क्षु**, **उदात्तः** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अजादीनाम् अङ्गस्य आट् उदात्तः लुङ्लङ्लृङ्क्षु** |

**आटश्च** (६.१.८९) = आडागमात् अचि परे पूर्वपरयोः वृद्धिरेकादेशो भवति | आटः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको यणचि**

(६.१.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः | **वृद्धिरेचि** (६.१.८७) इत्यस्मात् **वृद्धिः** इत्यस्य अनुवृत्तिः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति-सहितसूत्रम्— **आटः च अचि पूर्वपरयोः एकः वृद्धिः संहितायाम्** |

अत्र प्रश्नः उदेति— **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (६.४.७१), **आडजादीनाम्** (६.४.७२) अपि अङ्गकार्यम्; **इणो यण्** (६.४.८१) अपि अङ्गकार्यम् | **इणो यण्** (६.४.८१) परसूत्रम् अतः किमर्थं न **विप्रतिषेधे परं कार्यम्** (१.४.२) इत्यनेन **इणो यण्** (६.४.८१) परत्वात् प्रथमं स्यात् ? इ + अन् → **इणो यण्** (६.४.८१) इत्यनेन यणादेशः → य् + अन् → अधुना धातुः हलादिः अतः **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (६.४.७१) इत्यनेन अडागमो न तु आडागमः | तदा रूपम् 'अयन्' स्यात् न तु आयन् | किमर्थम् एवं न भवति ?

अत्र वार्ता एवं यत् लावस्थायाम् एव अट्/आट् भवति, अतः आगमः प्रथमं कार्यम् | लकारस्य एव आगमः अयम् | लुङ्लङ्लृङ्क्षु अडागमः आडागमः च भवतः, अतः निमित्तं लकारः एव इति कारणतः इदं कार्यं प्रथमम् | अनन्तरं लकारस्य स्थाने तिङ्-प्रत्ययादेशो भवति, तिङ्-निमित्तकं कार्यं च | **इणो यण्** (६.४.८१) इत्यनेन इण्-धातोः यण्-आदेशः भवति अजादिप्रत्यये परे— इदं कार्यं प्रत्ययनिमित्तं किन्तु **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (६.४.७१), **आडजादीनाम्** (६.४.७२) चेत्यनयोः कार्यं लकारनिमित्तम् | अतः सर्वप्रथमं लकारनिमित्तकः आगमः |

एतत् दृष्ट्वापि पुनः शङ्का आगच्छेत् यत् "अस्तु, आगमः लावस्थायां भवतु नाम किन्तु **आडजादीनाम्** (६.४.७२) इत्यस्य अपेक्षया **इणो यण्** (६.४.८१) परसूत्रम् अतः तस्य कार्यं प्रथमं स्यात्" | अत्र कश्चन अतीव महत्त्वपूर्णः सिद्धान्तः आयाति— अनयोः द्वयोः मध्ये कोऽपि बाध्यबाधकभावो नास्ति | **विप्रतिषेधे परं कार्यम्** (१.४.२) कदा कार्यं करोति ? समानकाले समानस्थले यदा द्वयोः सूत्रयोः मध्ये तुल्यबलविरोधः भवति, तदानीं **विप्रतिषेधे परं कार्यम्** (१.४.२) इति सूत्रस्य प्रसङ्गः | एकस्मिन् स्थले एकस्मिन् समये द्वयोः सूत्रयोः विरोधः | **आडजादीनाम्** (६.४.७२), **इणो यण्** (६.४.८१) इत्यनयोः कार्यकालः समानो न, कार्यस्थलमपि समानं न; अतः द्वयोः विरोधो नास्ति एव | अनेन कारणेन किं पूर्वसूत्रं किं परसूत्रम् इति वार्ता न आयाति एव | **आडजादीनाम्** इति लावस्थायाम्; **इणो यण्** (६.४.८१) इति तिङ्-अवस्थायां; कालः भिन्नः, **आडजादीनाम्** च प्रथमम् |

अपि च एकवारं यदा आगमः आगतः, तदा धेयं यत् तस्य आगमस्य अनन्तरम् आगमनिमित्तं कार्यं (यथा **आटश्च**) साक्षात् भवेत् इति नास्ति | केवलम् आगमः भवति; तदा सूत्रबलात् अग्रे कार्यस्य क्रमो भवतु | तर्हि अधुना स्थितिरस्ति एवम्—

इ + लङ-लकारः → **आडजादीनाम्** (६.४.७२) इत्यनेन आडागमः → आ + इ + लङ् → प्रथमपुरुषस्य बहुवचने तिङ्-आदेशः झि → आ + इ + झि → **झोऽन्तः** (७.१.३) इत्यनेन अन्त्-आदेशः, अन्ति; **इतश्च** (३.४.१००) इत्यनेन ङित्-लकारस्य स्थाने यः परस्मैपद-ह्रस्व-इकारान्त-तिङ्प्रत्ययः, तस्य अन्त्य-इकारस्य लोपः, अन्त्; **संयोगान्तस्य लोपः** (८.२.२३) इत्यनेन पदान्ते संयोगस्य अन्तिमवर्णलोपः → आ + इ + अन्

अत्र **आटश्च** (६.१.८९), **इणो यण्** (६.४.८१) च द्वयोः प्रसक्तिः | **आटश्च** (६.१.८९) इत्यनेन आडागमात् अचि परे पूर्वपरयोः वृद्धिरेकादेशो भवति | **इणो यण्** (६.४.८१) इत्यनेन इण्-धातोः यण्-आदेशः भवति अजादिप्रत्यये परे |

यथापूर्वम् अत्रापि तुल्यबलविरोधः नास्ति यतोहि कार्यस्थलं भिन्नम् | **आटश्च** (६.१.८९) इत्यस्य आ + इ इति स्थलम्; **इणो यण्** (६.४.८१) इत्यस्य इ + अन् इति स्थलम् | धेयं यत् समानस्थले कार्यं न जायमानम् | समानकाले, किन्तु समानस्थले न | अतः **अन्यत्रान्यत्रलब्धावकाशयोरेकत्रप्राप्तिस्तुल्यबलविरोधः** इत्यनेन तुल्यबलविरोधो न भवति | अपि च समानस्थलाभावात् अपवादस्य प्रश्नः नोदेति | कार्यस्थलं समानं नास्ति चेत् अपवादस्य अवकाशो नास्ति | तदर्थं न तुल्यबलविरोधः, न वा अपवादभूतत्वम् | तर्हि अत्र **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः** इति परिभाषया साक्षात् निर्णयः कर्तुं न शक्यते |

किन्तु इह कश्चन नूतनसिद्धान्तः आनेतव्यः | इण्-धातु-विषयकतया प्रतिपदोक्तत्वम् | व्याकरणशास्त्रे प्रतिपदम् इत्युच्यते यत्र साक्षात् नाम्ना आह्वानं भवति; प्रतिपदम् इत्यनेन नामग्रहणम् | अस्मिन् सिद्धान्ते शीघ्रावस्थितिकत्वमेव बीजम् | यथा 'एकः छात्रः आगच्छतु' इत्यनेन कञ्चन छात्रम् आह्वातुं शक्नुमः; 'चैत्र आगच्छ' इत्यपि रीत्या आह्वातुं शक्नुमः | उभयत्र छात्रस्य आह्वानम् | 'कश्चन छात्रः आगच्छातु' इत्यस्य अपेक्षया 'चैत्र आगच्छ' इत्यनेन शीघ्रं प्रवृत्तिर्भवति | कुतः इति चेत्, तस्य वाचकपदम् | प्रतिपदेन उक्तं → प्रतिपदोक्तम् | छात्रत्वावच्छिनः यः कोऽपि छात्रः भवितुम् अर्हति; किन्तु 'चैत्रत्वम् आगच्छ' इत्यनेन विशेषतया तस्य वाचकं यत् पदं, तस्य विशिष्टोच्चारणात् प्रतिपदोक्तं भवति | 'कश्चन छात्रः आगच्छातु' इत्यस्य कथनेन 'अहं न, अन्यः कश्चन छात्रः स्यात्' इति शङ्कातः शीघ्रम् उपस्थितिर्न भवति | किन्तु 'चैत्र आगच्छ' इत्यस्य कथनेन विलम्बः न भवति अपि तु शीघ्रोपस्थितिः |

प्रतिपदम् | पदं पदं प्रतिपदम् | तन्मात्रवृत्तिधर्मविशिष्टं पदम् | वीप्सया तत्पदमात्रवृत्तिधर्मपुरस्कारवैशिष्ट्यम् | तत्पदमात्रवृत्तिधर्मपुरस्कारेण ग्रहणं यत्र, तत् प्रतिपदम् इत्युच्यते | तदनुकूलव्यवच्छिन्नतया नाम इति अर्थः गृह्यते | यथा **इणो यण्** (६.४.८१) इत्यनेन यण्–आदेशः प्रतिपदोक्तः | **इको यणचि** (६.१.७७) इत्यनेन यण्–आदेशः लाक्षणिकः | **एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) इत्यनेनापि यण्–आदेशः लाक्षणिकः |

इतिवत् अत्र प्रकृतौ **इणो यण्** (६.४.८१) इत्यनेन इण्–धातोरेव यण्–आदेशो विधीयते; यस्य कस्यापि यण्–आदेशः इति न | किन्तु **आटश्च** (६.१.८९) इत्यनेन आडागमात् यस्मिन् कस्मिन्नपि अचि परे पूर्वपरयोः वृद्धिरेकादेशो भवति | अतः प्रतिपदोक्तस्य ग्रहणेन **आटश्च** (६.१.८९) इत्यस्य अपेक्षया **इणो यण्** (६.४.८१) इत्यस्य शीघ्रोपस्थितिः |

**लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्** इति परिभाषायाः आधारेण **प्रतिपदोक्तस्य बलवत्वम्** इत्युच्यते | इयं परिभाषा सम्पूर्णरीत्या स्वीक्रियते चेत् तस्याः कार्यम् प्रसङ्गश्च अन्यत्र | अतः अत्र तस्य समग्रप्रतिपादनं न दीयते; किन्तु सारांशः अस्ति यत् लक्षणस्य अपेक्षया प्रतिपदोक्तस्य ग्रहणं, नाम बलवत्वम् | **आटश्च** (६.१.८९) इयि सूत्रे निमित्तं लक्षणरूपेण एव दीयते; **इणो यण्** (६.४.८१) इति सूत्रे प्रतिपदोक्तम् अस्ति |

कुतः बलवत्वम् इति चेत्, तस्य बुद्धौ शीघ्रम् उपस्थितिर्भवति | अनेन प्रतिपदोक्तं सर्वतो बलवत् | यत्र 'अपवादः' इति साक्षात् वक्तुं न शक्यते, तत्र विशिष्टत्वात् प्रतिपदोक्तत्वात् बलवत्वम् इति वदने सामर्थम्  | ततः उच्यते यत् प्रतिपदोक्तम् अपवादसदृशम् | अपवादः बाधते, तद्वत् प्रतिपदोक्तम् अपि बाधते | कुतः इति चेत् तस्य नामग्रहणपूर्वक–विधिरस्ति, अनेन शीघ्रं प्रवृत्तिर्भवति |

अतः अत्र यद्यपि **इणो यण्** (६.४.८१) इत्यस्य कार्यस्थलम् **आटश्च** (६.१.८९) इति कर्यस्थलात् भिन्नम् इति कारणतः तस्य अपवादभूतत्वम् इति वक्तुं न शक्येत, तथापि प्रतिपदोक्तत्वस्य बलेन बाधकत्वम् | तुल्यबलविरोधस्याभावात् प्रतिपदोक्तत्वात् बाधकत्वम् इत्युच्यते | तर्हि प्रतिपदोक्तत्वस्य बलवत्वे **इणो यण्** (६.४.८१) | **इणो यण्** (६.४.८१) इत्यस्य प्रतिपदोक्तत्वात् इण्–धातुं ग्रहीत्वा यण्–आदेशः विधीयते—

आहत्य इ + लङ्–लकारः → **आडजादीनाम्** (६.४.७२) इत्यनेन आडागमः → आ + इ + लङ् → तिङ्–आदेशः च प्रथमपुरुषस्य बहुवचने सिद्धतिङ्–प्रत्ययः अन् → आ + इ + अन् → **इणो यण्** (६.४.८१) इत्यनेन यणादेशः → आ + य् + अन् → (**आटश्च** (६.१.८९) इत्यस्य अधुना प्रसङ्गो नास्ति →) आयन्

द्वयोः सूत्रयोर्मध्ये **इणो यण्** (६.४.८१) प्रथमं; तदा **आटश्च** (६.१.८९) इत्यभविष्यत् किन्तु तावता प्रसङ्गो नास्त्येव आगमोत्तरस्य अचः अभावात् |

आ + इ + अन् | अत्र **आटश्च** (६.१.८९), **इणो यण्** (६.४.८१) च द्वयोः प्रसक्तिः | अत्र प्रतिपदोक्तत्वात् **इणो यण्** (६.४.८१) इत्युक्तम् | परन्तु अत्र **वार्णादाङ्गं बलीयः** इत्यपि कार्यं करोति अत्र | द्वयोः परस्परसमर्थनं; द्वयोः कारणकथने न काऽपि समस्या |

**वार्णादाङ्गं बलीयः** | [परिभाषा ५५] – वर्णस्य इदं वार्णम्; वर्णं निमित्तीकृत्य जायमानं कार्यम् | वर्णसम्बद्धं वार्णम् | अङ्गस्य इदम् आङ्गम् | अङ्गनिमित्तिकं वा अङ्गोद्दिशिकं वा कार्यम् आङ्गम् | अङ्गसम्बद्धम् आङ्गम् | वर्णनिमित्तिक–कार्यापेक्षया अङ्गाधिकारस्य कार्यं प्रबलम् |

इति सामान्यचिन्तनम् | वस्तुतः अत्र पक्षद्वयं वर्तते | एकस्मिन् पक्षे इ + लङ → लावस्थायाम् **आडजादीनाम्** (६.४.७२) इत्यनेन आडागमः → ततः अग्रे यथोक्तम् | अपरस्मिन् पक्षे इ + लङ् → इ + झि, अन्ति, अन्त्, अन् → **इणो यण्** (६.४.८१) इत्यनेन अजादौ प्रत्यये परे यणादेशः → य् + अन् → **असिद्धवदत्राभात्** (६.४.२२) इत्यनेन यणादेशस्य असिद्धत्वात् अजादित्वम् आश्रित्य **आडजादीनाम्** (६.४.७२) इत्यनेन आडागमः → आ + य् + अन् → (**आटश्च** (६.१.८९) इत्यस्य अधुना प्रसङ्गो नास्ति →) आयन्

**आडजादीनाम्** (६.४.७२), **इणो यण्** (६.४.८१) इत्यनयोः कार्यम् आभीयकार्यम्—

**असिद्धवदत्राभात्** (६.४.२२) = कमपि आश्रयम् अधिकृत्य आभीय–कार्यं, द्वितीयं समानाश्रितम् आभीय–कार्यं प्रति असिद्धं भवति | अधिकारसूत्रम् | **भस्य** (६.४.१२९) इति अधिकारसूत्रेण भ–संज्ञा सम्बद्धकार्याणि भवन्ति षष्ठाध्ययस्य अन्तपर्यन्तम् | **असिद्धवदत्राभात्**

(६.४.२२) इत्यनेन ६.४.२३ इत्यस्मात् आरभ्य, **भस्य** इत्यस्य अधिकारस्य अन्तपर्यन्तम् (६.४.१७५), एषां कार्याणां नाम आभीय–कार्यम् | असिद्धवत् अव्ययपदयम्, अत्र अव्ययपदयम्, आ अव्ययपदयं, भात् पञ्चम्यन्तम्, अनेकपदमिदं सूत्रम् | 'असिद्धवत्' इत्युक्ते 'यथा न अजनिष्यत' | सूत्रस्य विधानं जातं, कार्यञ्च सिद्धं; किन्तु अनेन सूत्रेण द्वितीयसूत्रं प्रति प्रथमस्य कार्यं 'यथा नाभविष्यत्' अतः 'असिद्धवत्' इत्युक्तम् | 'समानाश्रितं कार्यम्' इति अर्थः उदेति 'अत्र' इति अव्ययपदेन | अस्मिन् + त्रल् → 'अत्र' | 'अस्मिन्' इत्यस्य सप्तम्यन्तत्वेन निमित्तत्वम् इति आशयः | सूत्रं स्वयं सम्पूर्णम्— **असिद्धवत् अत्र आ भात्** |

अन्–प्रत्ययम् आश्रित्य **आडजादीनाम्** (६.४.७२), **इणो यण्** (६.४.८१) इत्यनयोः कार्यं भवति | अत्र इण्–धातोः 'इ' इत्यपि द्वयोः आश्रयः | **आडजादीनाम्** (६.४.७२) इति सूत्रमपि, **इणो यण्** (६.४.८१) इति सूत्रमपि षष्ठाध्यायस्य चतुर्थपादस्य द्वाविंशसूत्रमारभ्य षष्ठाध्यायस्य अन्तः इति यावत्, अस्मिन् गोचरे अस्ति इति कृत्वा आडागमः अपि यणादेशः अपि आभीयकार्यम् |

**आडजादीनाम्** (६.४.७२) = लुङ् लङ् लृङ् च परे चेत्, अजादिधातुरूपि–अङ्गस्य आट्–आगमो भवति; स च अडागमः उदात्त–संज्ञकः | अनुवृत्ति–सहितसूत्रम्— **अजादीनाम् अङ्गस्य आट् उदात्तः लुङ्लङ्लृङ्क्षु** |

**इणो यण्** (६.४.८१) = इण्–धातोः यण्–आदेशः भवति अजादिप्रत्यये परे | अनुवृत्ति–सहितसूत्रम्— **इणः अङ्गस्य यण् अचि** |

तर्हि अस्मिन् पक्षे लकार–प्रत्ययस्य उपस्थितिः आदौ भवति, तन्निमित्तकादेशाः च आदौ भवन्ति, ततः परम् अजादिप्रत्ययत्वम् आदाय **इणो यण्** (६.४.८१) इत्यनेन यणादेशः, तस्य च असिद्धत्वात् **आडजादीनाम्** (६.४.७२) इत्यनेन आडागमः |

अत्र प्रश्नः उदेति, एकवारम् आरम्भे **इणो यण्** (६.४.८१) इति शास्त्रम् उपस्थितं भवति चेत्, तस्य असिद्धत्वात् **आडजादीनाम्** (६.४.७२) इत्यनेन आडागमः भवेत् | किन्तु कस्य बलेन आडागमात् प्राक् यण्–आदेशो विधीयेत ? **आडजादीनाम्** (६.४.७२) इति लावस्थायाम् | **इणो यण्** (६.४.८१) इति सिद्धतिङ्प्रत्ययसाधनानन्तरमेव | अपि च लावस्थायाम् आडागमः इति पक्षे **असिद्धवदत्राभात्** (६.४.२२) इति शास्त्रम् नापेक्षते | साक्षात् **आडजादीनाम्** (६.४.७२) इत्यनेन आडागमः, तदा प्रतिपदोक्तत्वात् **इणो यण्** (६.४.८१), फलतः आयन् इति रूपम् | अतः अत्र लाघवम् | **असिद्धवदत्राभात्** (६.४.२२) इत्यस्य अपेक्षा एव नास्ति |

तर्हि द्वितीये पक्षे कस्य बलेन आडागमात् प्राक् यण्–आदेशो विधीयेत ? लावस्थायाम् आडागमः इति पक्षे लाघवम् इति सत्यं; किन्तु तथा सति **असिद्धवदत्राभात्** (६.४.२२) इत्यस्य पाठः कुतः इति प्रश्नः | आभीयपाठस्य का गतिः ? **इणो यण्** (६.४.८१) **आडजादीनाम्** (६.४.७२) इति सूत्रद्वयम् आभीयशास्त्रे अन्तर्गतं, तस्य च कारणं स्यात् | **इणो यण्** (६.४.८१) सर्वप्रथमं न भवति चेत्, किमर्थम् आभीयकार्यम् इदम् | इदमेव आभीयपाठस्य सार्थक्यम् | अत्र भाष्यकारस्य कथनमिदं यत् तेन ज्ञायते आदौ लकारनिमित्तकार्याणि, ततः परमेव आडागमः |

प्रथमपक्षस्य परित्यजने, अन्यत् कारणमपि उक्तम् महाभाष्ये | किमिति चेत्, धातुः नाम क्रियावाचकः | क्रियायाः स्वाश्रयाकाङ्क्षा भवति; नो चेत् क्रिया न प्रतीयते | धातुरेव क्रियां न बोधयति | क्रियायाः स्वाश्रयसमवधाने एव धातुः क्रियां बोधयेत् | कर्तृबोधकप्रत्ययः परः यदा भवति, तदानीम् अयं धातुः परिपूर्णतया क्रियां बोधयितुं समर्थः भवति | क्रियायाः आश्रयबोधकप्रत्ययः नास्ति चेत् धातुः क्रियां कथं वा बोधयेत् ? लकारः आश्रयबोधकप्रत्ययः | तं विना 'अयं धातुः' इति व्यवहारः एव वस्तुतः न कर्तव्यः | कुतः इति चेत्, क्रियां न बोधयति | तर्हि कदा बोधयति ? स्वबोध्यक्रियायाः आश्रयः अस्ति चेदेव धातुः क्रियां बोधयति | भू–धातोः लट् इति प्रयोगे 'भू–धातुः' अर्थविज्ञानपदम् | इतः परं यदा लट्–प्रत्ययः करिष्यते, तदानीं परिपूर्णधातुः अयम् | प्रत्ययस्य उत्पत्तेः पूर्वम् 'अयं धातुः' इति व्यवहारः गौणः | अनेन लकार–प्रत्ययस्य उपस्थितिः आदौ भवति, तन्निमित्तककार्याणि च आदौ भवन्ति इति वक्तव्यम् | अस्मात् कारणादपि लावस्थायाम् अट् इति पक्षः परित्यक्तः |

आहत्य कारणत्रयेण **इणो यण्** (६.४.८१) सर्वप्रथमम् आयाति— १) आभीयपाठस्य सार्थक्यार्थम्; २) प्रतिपदोक्तत्वात्; ३) विशिष्टधातोः क्रियाबोधकत्वात् |

द्वौ प्रश्नौ अवशिष्टौ—
1) किमर्थं सामान्यक्रमः एतादृशः दत्तः— १) (लङि) अडागमः आडागमः च | २) तिङ्–निमित्तम् अङ्गकार्यम् | ३) (लङि) आडागमे सति वृद्धि–कार्यम् | ४) तिङ्प्रत्यय–योजनं, तत्सम्बद्ध–सन्धिकार्यम् |

चिन्तयामः चेत्, अयं क्रमः स्वाभाविकः |

१) (लङि) अडागमः आडागमः च | **आडजादीनाम्** (६.४.७२) इति सूत्रं लावस्थायां विधीयते, अतः इदं सूत्रं सामान्यरूपेण सर्वाप्रथमं भवेत् |
२) तिङ्–निमित्तम् अङ्गकार्यम् | अङ्गकार्यम् इदम्, अतः बलवत् |
३) (लङि) आडागमे सति वृद्धि–कार्यम् | **आटश्च** (६.१.८९) वर्णनिमित्तकं कार्यम्, अतः अनन्तरं स्यात् | किन्तु अन्तरङ्गत्वात् तिङ्प्रत्यय–योजनात् प्राक् |
४) तिङ्प्रत्यय–योजनं, तत्सम्बद्ध–सन्धिकार्यम् | परम्परया अपि अन्तिमं कार्यम् | किन्तु आधिक्येन तृतीयचतुर्थयोर्मध्ये किं प्रथमम् इत्यस्मिन् महत्त्वं नास्ति | अवदत् | ऐच्छत् | ऐधत् |

भिन्नरीत्या चिन्त्यते केवलं इण्–धातोः अस्–धातोः प्रसङ्गे च | **इणो यण्** (६.४.८१) इत्यनेन इ–धातुः → आयन् | **श्नसोरल्लोपः** (६.४.१११) इत्यनेन अस्–धातुः → आसीत् |

2) इ + लङ् → इ + त् → **आडजादीनाम्** (६.४.७२) → आ + इ + त्

अत्र प्रथमं **आटश्च** (६.१.८९) इति क्रियते चेत्, **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य आवश्यकता एव नास्ति | प्रथमं **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति क्रियते चेत्, अनन्तरं **आटश्च** (६.१.८९) इति भवति | द्वाभ्यां मार्गाभ्यां ऐत् इति रूपं सिध्यति | तर्हि किं साधु ?

**आटश्च** (६.१.८९) = आडागमात् अचि परे पूर्वपरयोः वृद्धिरेकादेशो भवति | अनुवृत्ति–सहितसूत्रम्— **आटः च अचि पूर्वपरयोः एकः वृद्धिः संहितायाम्** |
**सार्वधातुकार्धधातुकयोः** (७.३.८४) = इगन्ताङ्गस्य इकः गुणः भवति सार्वधातुके आर्धधातुके च प्रत्यये परे | अनुवृत्ति–सहितसूत्रम्— **इकः अङ्गस्य गुणः सार्वधातुकार्धधातुकयोः** |

अत्र कृताकृतप्रसङ्गः **आटश्च** (६.१.८९) इत्यस्य, तस्मात् **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति सूत्रं प्रति नित्यं, तस्माच्च बलवत् |

**पूर्वोपस्थितनिमित्तकम् अन्तरङ्गम्** | यस्य कार्यस्य निमित्तं पूर्वम् उपस्थितं, तदन्तरङ्गम् |

**आटश्च** (६.१.८९) इत्यस्य इ–धातोः इ–कारः इति निमित्तं पूर्वम् उपस्थितः | **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य यः त्–प्रत्ययः इति निमित्तम् अनन्तरम् | अतः **पूर्वोपस्थितनिमित्तकम् अन्तरङ्गम्** इत्यनेन **आटश्च** (६.१.८९) इत्यस्य अन्तरङ्गत्वम् |

**पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः** इति परिभाषया नित्यापेक्षया अन्तरङ्गत्वं बलवत् | अतः 'नित्यम्' इत्यस्य बलेन **आटश्च** (६.१.८९) इति न, अपि तु अन्तरङ्गत्वम् इत्यस्य बलेन **आटश्च** (६.१.८९) प्रथमं भवतु |

किन्तु अन्ततो गत्वा **वार्णादाङ्गं बलीयः** इत्यनेन **सार्वधातुकार्धधातुकयोः** (७.३.८४) प्रथमं भवति | **पूर्वोपस्थितनिमित्तकम् अन्तरङ्गम्** इत्यस्मात् **वार्णादाङ्गं बलीयः** इति परिभाषा बलवती | तदर्थं प्रथमं **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य प्राप्तिः, तदा एव **आटश्च** (६.१.८९) |

3) चिन्तनार्थं भाष्यकारः प्रतिपादयति यत् **आडजादीनाम्** (६.४.७२), **आटश्च** (६.१.८९) इत्यनयोः अष्टाध्याय्याम् आवश्यकता एव नास्ति | **लुङ्लङ्लृङ्क्ष्वडुदात्तः** (६.४.७१) च '**अटश्च**' च इत्येव पर्याप्तम्; आभ्यां सर्वाणि रूपाणि सिध्येरन् | ऐच्छत्, ऐधत् | चिन्तनस्य विषयः !

B. इक् स्मरणे इति धातुः

इक् स्मरणे नित्यम् अधि–उपसर्गपूर्वकः धातुः, परस्मैपदी च |

अत्र अवधेयं यत् यथापूर्वं, कार्यस्य एकः क्रमः वर्तते | तं क्रमम् आधारीकृत्य प्रक्रिया प्रवर्तनीया— १) (लङि) अडागमः आडागमः च | २) तिङ्-निमित्तम् अङ्गकार्यम् | ३) (लङि) आडागमे सति वृद्धि-कार्यम् | ४) तिङ्प्रत्यय-योजनं, तत्सम्बद्ध-सन्धिकार्यम् | यथासामान्यम्, अङ्गकार्यं सन्धिकार्यम् इत्यनयोः मध्ये प्रथमम् अङ्गकार्यं, तदा एव सन्धिकार्यम् |

इक् स्मरणे इति धातौ **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्य प्रसक्तिः न तु **इणो यण्** (६.४.८१), नाम इयङ्-आदेशः प्रसक्तः न तु यण्-आदेशः | तर्हि अजाद्यपित्सु इयङ् कृत्वा अधि + इ + अन्ति → अधि + इय् + अन्ति → अधीयन्ति इति भवेत् | किन्तु तथा न भवति, अधियन्ति इत्येव भवति | अत्र धेयं यत् एकं गणसूत्रं वर्तते **इण्वदिक इति वक्तव्यम्** | अनेन इक्-धातुः इण-धातुवदेव भवति | अतः अत्र अधि + इक्, इण्वत् भवति | प्रथमम् इण्-धातोः रूपं निर्मातु, तदा अधि योजयतु, अपि च यथा आवश्यकता सन्धिकार्यं करोतु | आहत्य इक्-धातोः अजाद्यपित्सु इयङ्-आदेशो न भवति अपि तु इण्-वत् यण्-आदेश एव भवति |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

C. इङ् अध्ययने इति धातुः

इङ्-धातुः ङित् अतः आत्मनेपदिधातुः, नित्यम् अधि-पूर्वः च |

१) हलादि पित्सु = आत्मनेपदिधातुषु गुणकार्यं नास्ति एव |
२) अजादि पित्सु = गुणः, अयादेशः | अधि + इ + ऐ → गुणे अधि + ए + ऐ → अय्-आदेशः अधि + अय् + ऐ → सन्धिकार्यम् इको यणचि → अध्यय् + ऐ → अध्ययै
३) हलाद्यपित्सु = क्ङिति च, गुणनिषेधः | अधि + इ + ते → अकः सवर्णे दीर्घः → अधीते
४) अजाद्यपित्सु = क्ङिति च, गुणनिषेधः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यस्य प्रसक्तिः | अधि + इ + आते → अधि + इय् + आते → अधि + इयाते → अकः सवर्णे दीर्घः → अधीयाते

अत्र अवधेयं यत् यथापूर्वं, कार्यस्य एकः क्रमः वर्तते | तं क्रमम् आधारीकृत्य प्रक्रिया प्रवर्तनीया— १) (लङि) अडागमः आडागमः च | २) तिङ्-निमित्तम् अङ्गकार्यम् | ३) (लङि) आडागमे सति वृद्धि-कार्यम् | ४) तिङ्प्रत्यय-योजनं, तत्सम्बद्ध-सन्धिकार्यम् | ५) उपसर्ग-योजनं, तत्सम्बद्ध-सन्धिकार्यम् |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

D. वी-धातुः गतिव्याप्ति-प्रजनकान्त्यसन-खादनेषु

१) हलादि पित्सु = गुणः | वी + ति → वेति
२) अजादि पित्सु = गुणः, अयादेशः | वी + आनि → वे + आनि → व् + अय् + आनि → वयानि
३) हलाद्यपित्सु = क्ङिति च, गुणनिषेधः | वी + तः → वीतः

४) अजाद्यपित्सु =  क्ङिति च, गुणनिषेधः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यनेन इयङ् आदेशः | वी + अन्ति → व् + इय् + अन्ति → वियन्ति

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

E. शीङ् स्वप्ने इति धातुः

**शीङः सार्वधातुके गुणः** (७.४.२१) =  शीङ्–धातोः गुणः भवति सार्वधातुकप्रत्यये परे | अनेन सूत्रेण शीङ्–धातोः गुणः भवति न केवलं पित्सु अपि तु अपित्सु अपि | **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा–सूत्रेण, **इकः** स्थानी भवति यत्र स्थानी नोक्तम्, अतः अत्र ईकारः स्थानी भवति | शीङः षष्ठ्यन्तं, सार्वधातुके सप्तम्यन्तं, गुणः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **शीङः अङ्गस्य गुणः सार्वधातुके** |

अपित्सु प्रत्ययेषु **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणः आदिश्यते, तदा **क्ङिति च** (१.१.५) इत्यनेन गुण–निषेधः | तदा **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनेन पुनः गुणः | अत्र **क्ङिति च** (१.१.५), **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनयोः कः सम्बन्धः ? **क्ङिति च** (१.१.५) इति प्रबाध्य **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनेन गुणो वा ? इति चेत् **शीङः सार्वधातुके गुणः** (७.४.२१), **क्ङिति च** (१.१.५) इत्यस्य अपवादः इति वा ?

१) हलादि पित्सु = आत्मनेपदिधातुषु नास्ति एव |
२) अजादि पित्सु = गुणः, अयादेशः | शी + ऐ → श् + ए + ऐ → श् + अय् + ऐ → शयै
३) हलाद्यपित्सु = गुणः | शी + ते → शे + ते → शेते
४) अजाद्यपित्सु = गुणः, अयादेशः | शी + आते → शे + आते → श् + अय् + आते → शयाते

**शीङो रुट्** (७.१.६) = शीङ्–धातुतः झ्–प्रत्ययावयवस्य स्थाने यः अत्, तस्य रुट्–आगमो भवति | **आद्यन्तौ टकितौ** इत्यनेन अत् इत्यस्य आद्यवयवः | शीङः पञ्चम्यन्तं, रुट् प्रथमान्तं, द्विपदमिदं सूत्रम् | **झोऽन्तः** (७.१.३) इत्यस्मात् **झः** इत्यस्य अनुवृत्तिः; **अदभ्यस्तात्** (७.१.४) इत्यस्मात् षष्ठ्यन्तस्य विभक्तिपरिणामेन **अतः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **शीङः अङ्गात् झः अतः रुट्** |

अनुबन्धलोपे ‸ इति आगमः | अते → रते | अताम् → रताम् | अत → रत |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

तर्हि प्रश्नः आगतः आसीत् यत् **क्ङिति च** (१.१.५) इति प्रबाध्य **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनेन गुणो वा ? इति चेत् **शीङः सार्वधातुके गुणः** (७.४.२१), **क्ङिति च** (१.१.५) इत्यस्य अपवादः इति वा ? अत्र त्रयाणां सूत्राणां निमित्तं किमिति ज्ञातव्यम् | **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन इगन्ताङ्गस्य इकः गुणः भवति सार्वधातुके आर्धधातुके च प्रत्यये परे | **सार्वधातुकमपित्**

(१.२.४) इत्यनेन अपित् सार्वधातुकं ङिद्वत् अस्ति | **क्क्ङिति च** (१.१.५) इत्यनेन यः प्रत्ययः गित्, कित् अथवा ङित् अस्ति, अपि च तस्मात् प्रत्ययात् पूर्वं तस्य एव प्रत्ययस्य कारणतः इकः स्थाने गुणः वा वृद्धिः वा भवति स्म, सः (गुणः वृद्धिः) न भवति | **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनेन शीङ्-धातोः गुणः भवति सार्वधातुकप्रत्यये परे | **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन इग्लक्षणगुणः क्रियते; **क्क्ङिति च** (१.१.५) इत्यनेन इग्लक्षणगुणः निषेध्यते; पुनः **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनेन इग्लक्षणगुणः क्रियते | त्रिषु अपि **इको गुणवृद्धी** (१.१.३) इत्यनेन परिभाषा-सूत्रेण, **इकः** स्थानी भवति यत्र स्थानी नोक्तम् |

वस्तुतः **शीङः सार्वधातुके गुणः** (७.४.२१) कुत्रापि स्वतन्त्रतया कार्यं न करोति; कुत्रचित् गुणं प्रबाध्य, कुत्रचित् गुणनिषेधं प्रबाध्य च स्वकार्यं करोति |

शी + लट् → शी + ते → **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणः → **क्क्ङिति च** (१.१.५) इत्यनेन गुण-निषेधः → **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनेन गुणः |
शी + लोट् → शी + ऐ → **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणः → **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनेन गुणः |

अत्र अपवादस्य विषयः वा इति प्रश्नः | **क्क्ङिति च** (१.१.५), **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनयोः एकत्रप्राप्तिः नास्ति | तर्हि अपवादः कथं वा स्यात् ?

**निरवकाशो विधिरपवादः** इति अपवादस्य लक्षणम् | **विप्रतिषेधे परं कार्यम्** (१.४.२) इत्यस्य कृते द्वयोः सूत्रयोः **तुल्यबलविरोधः** अपेक्षते; **तुल्यबलविरोधः** इत्यर्थम् एकत्रप्राप्तिः अपेक्षते | **अन्यत्रान्यत्रलब्धावकाशयोरेकत्रप्राप्तिस्तुल्यबलविरोधः** | एकत्रप्राप्तिः अपेक्षते परशास्त्रे, नित्यशास्त्रे च; अन्तरङ्गशास्त्रे क्वचित् भवति, क्वचित् न भवति | किन्तु अपवादशास्त्रे **निरवकाशो विधिरपवादः** इति लक्षणम्; अत्र साक्षात् एकत्रप्राप्तिः भवेत् इति नोक्तम् | सामान्यतया द्वयोः सूत्रयोः एकत्रप्राप्तिः अस्ति, द्वयोः मध्ये च एकस्य अन्यत्रलब्धावकाशो नास्ति इति स्थितौ 'अपवादः' इति वदामः | अत्र केचन वैयाकरणाः वदन्ति यत् एकत्रप्राप्तिभिन्नविषयेऽपि कुत्रचित् अपवादः स्वीक्रियते | मातृभिरुच्यते किन्तु यत् वस्तुतः अपवादविषये कुत्रापि एकत्रप्राप्तिर्नास्त्येव |

यथा **आद्गुणः** (६.१.८७), **वृद्धिरेचि** (६.१.८८) | कृष्ण + एकत्रम् | अत्र **आद्गुणः** (६.१.८७) भवति अचि परे; **वृद्धिरेचि** (६.१.८८) भवति एचि परे | एकत्रप्राप्तिः अस्ति किम् ? मातृभिः उच्यते यत् 'अचि परे' इत्यनेन सर्वक्षेत्रं स्वीकृतम् | अतः **आद्गुणः** (६.१.८७) इत्यस्य एव प्राप्तिः | तदनन्तरमेव **आद्गुणः** (६.१.८७) इत्यस्य प्राप्तेः कारणतः **वृद्धिरेचि** (६.१.८८) इत्यस्य निरवकाशत्वम् | अस्य निरवकाशत्वस्य बलेन **आद्गुणः** (६.१.८७) इति शास्त्रं प्रबाध्य **वृद्धिरेचि** (६.१.८८) प्राप्नोति |

**आद्गुणः** (६.१.८७) = अवर्णात् अचि परे पूर्वपरयोः स्थाने गुणसंज्ञकः एकादेशः स्यात् | अनुवृत्ति-सहितसूत्रम्— **आत् अचि पूर्वपरयोः एकः गुणः संहितायाम्** |

**वृद्धिरेचि** (६.१.८८) = अवर्णात् एचि परे पूर्वपरयोः स्थाने वृद्धिसंज्ञक-एकादेशः स्यात् | अनुवृत्ति-सहितसूत्रम्— **आत् एचि पूर्वपरयोः एकः वृद्धिः संहितायाम्** |

महाभाष्यवाक्यम् – **अन्यत्रान्यत्रलब्धावकाशयोरेकत्रप्राप्तिस्तुल्यबलविरोधः** | लब्धः अवकाशः यस्य तत्, लब्धावकाशं सूत्रम् | यदि द्वे सूत्रे स्तः ययोः द्वयोरपि अन्यत्र क्वचित् कार्यं कर्तुम् अवकाशोऽस्ति, अपि च यदि इमे द्वे सूत्रे युगपत् एकस्मिन् स्थले कार्यं कर्तुम् आगच्छतः, तर्हि इमे द्वे सूत्रे **तुल्यबले** इत्युच्यते | अपि च समानस्थले समानकाले कार्यं कर्तुं तयोः द्वयोः यः परस्परः सङ्घर्षः, सः **तुल्यबलविरोधः** इत्युच्यते |

**विप्रतिषेधे परं कार्यम्** (१.४.२) = समानकाले तुल्यबले सूत्रे कार्यं कर्तुम् आयातश्चेत्, परसूत्रस्य कार्यं पूर्वं भवति | विप्रतिषेधे सप्तम्यन्तं, परं प्रथमान्तं, कार्यं प्रथमान्तं, त्रिपदमिदं सूत्रम् | विप्रतिषेध इत्युक्ते समानबलयोः सूत्रयोः सङ्घर्षः |

प्रकृतौ शी + लोट् → शी + ऐ इति स्थितौ **सार्वधातुकार्धधातुकयोः** (७.३.८४), **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनयोः प्रसक्तिः एकत्र भवति— इत्युक्तौ एकत्रप्राप्तिः | **सार्वधातुकार्धधातुकयोः** (७.३.८४) इति औसर्गिकशास्त्रम् अतः प्रथमतया 'आयाति'; नाम प्रक्रियायाः प्रतिपादनर्थं प्रथमतया प्रदर्श्यते | तदा **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यस्य प्रतिपदोक्तत्वात् बलवत्वम् | **शीङः सार्वधातुके गुणः** (७.४.२१) इति सूत्रम् अस्य कृते एव निर्मितम् इति कृत्वा अस्य अधिकारः | शी + ऐ → **शीङः सार्वधातुके गुणः**

(७.४.२१) → शे + ऐ | प्रतिपदोक्तत्वम् अन्तरङ्गस्य क्षेत्रे पठितम्; अपवादस्य प्रसङ्गः नास्ति |

शी + लट् → शी + ते | अत्रापि **सार्वधातुकार्धधातुकयोः** (७.३.८४), **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यनयोः एकत्रप्राप्तिः | अत्रापि च **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य औसर्गिकत्वात् प्रथमं प्रदर्श्यते | शी + ते → **सार्वधातुकार्धधातुकयोः** (७.३.८४) | अत्र अपित्त्वात् **क्क्ङिति च** (१.१.५) इत्यनेन गुणनिषेधः | यदा गुणः निषिद्धः, तदा **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यस्य प्रसक्तिः | कस्य बलेन तस्य कार्यं भवति ? अन्यत्रलब्धावकाशत्वं नास्ति, नाम निरवकाशत्वं सिद्धम्, इति वक्तुं न शक्यते यतोहि लोटि प्राप्तिः जाता इति अधुनैव प्रदर्शितम् | निरवकाशत्वस्याभावात् अत्रापि अपवादस्य प्रसङ्गो न | प्रतिपदोक्तत्वात् एव, विशिष्टत्वात् एव, **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यस्य प्राप्तिः | धेयं यत् **क्क्ङिति च** (१.१.५) प्रति **शीङः सार्वधातुके गुणः** (७.४.२१) परशास्त्रं; किन्तु द्वयोः एकत्रपाप्तिः नास्ति इत्यस्मात् तुल्यबलविरोधो नास्ति | तदर्थं **विप्रतिषेधे परं कार्यम्** (१.४.२) इत्यस्य प्रसक्तिः नास्ति | प्रतिपदोक्तत्वादेव शी + ते → **शीङः सार्वधातुके गुणः** (७.४.२१) → शे + ते |

यत्र विधिः भवति, तदा निषेधो भवति, तदा पुनः विधिः, अस्य नामकरणं प्रतिप्रसवः इति उच्यते | अनेन **क्क्ङिति च** (१.१.५) इति सूत्रस्य अर्थसङ्कोचः अपि वक्तुं शक्यते— गिति किति ङिति प्रत्यये परे तत्पूर्वस्य इकः गुणः वृद्धिः च निषिद्धः, **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यस्य स्थलं वर्जयित्वा | अयं सिद्धान्तः अत्र प्रतिपदोक्तत्वस्य समर्थनं करोति |

धेयं यत् **शीङः सार्वधातुके गुणः** (७.४.२१) इत्यस्य प्रसक्तिः सार्वधातुकप्रत्यये परे एव, अतः णिचि ण्वुलि च अस्य कार्यं नास्ति | तत्र उभयत्र **अचो ञ्णिति** (७.२.११५) इत्यनेन वृद्धिः | शाययति, शायकः इति |

F. दीधीङ् दीप्तिदेवनयोः इति धातुः |

दीप्तिः इति प्रकाशः; देवनम् इति दुःखम् | छान्दसि (वेदे) | आत्मनेपदिधातुः |

अदादिगणस्य **जक्षित्यादयः** इति अन्तर्गणे सप्त धातवः सन्ति— जक्ष्, जागृ, दरिद्रा, चकास्, शास्, दीधीङ्, वेवीङ् च | **जक्षित्यादयः षट्** (६.१.६) इति सूत्रेण जक्षित्यादीनां धातूनाम् अभ्यस्त-संज्ञा भवति | जक्षित्यादिषु धातुषु दीधीङ्, वेवीङ् च स्तः; किन्तु द्वयोः आत्मनेपदित्वात्, सार्वधातुकलकारेषु किमपि विशिष्टम् अभ्यस्तसंज्ञा-निमित्तं कार्यं नास्ति | (परस्मैपदेषु लटि, लोटि, लङि च तिङ्-प्रत्ययादेशाः सन्ति; ते तु आत्मनेपदे न भवन्ति |)

**दीधीवेवीटाम्** (१.१.६) = दीधी, वेवी इति धातू, इडागमः चेत्येषां गुणः वृद्धिश्च न भवतः |

**एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) = असंयोगपूर्व-अनेकाच्-इकारान्ताङ्गस्य यण्-आदेशो भवति अचि परे |

१) हलादि पित्सु = आत्मनेपदिधातुषु नास्ति एव |
२) अजादि पित्सु = गुणनिषेधः, यणादेशः | दीधी + ऐ → दीध्य् + ऐ → = दीध्यै
३) हलाद्यपित्सु = गुणनिषेधः | दीधी + ते → दीधीते
४) अजाद्यपित्सु = गुणनिषेधः, यणादेशः | दीधी + आते → दीध्य् + आते → दीध्याते

अजादिषु पित्सु अपि, अजाद्यपित्सु अपि चिन्तनं समानम्— **इको यणचि** (६.१.७७) इत्यनेन यण्-आदेशः; तत्कार्यं प्रबाध्य **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणकार्यस्य प्रसक्तिः अस्ति, परन्तु **दीधीवेवीटाम्** (१.१.६) इत्यनेन गुण-निषेधः | तदा **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ्-प्रसक्तिः, तत् प्रबाध्य **एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) इत्यनेन यणः प्राप्तिः |

इकारादिप्रत्ययेषु **यीवर्णयोर्दीधीवेव्योः** (७.४.५३) इत्यनेन दिधी-धातोः अन्त्यवर्ण-इकारस्य लोपः भवति |

दीधी + ईत → दीध् + ईत → दीधीत

**दीधीवेवीटाम्** (१.१.६) = दीधी, वेवी इति धातू, इडागमः चेत्येषां गुणः वृद्धिश्च न भवतः | अनेन इडागमस्य गुणः न कदापि भवति— यथा गम् + इ + स्यति → गमिष्यति; तस्य वृद्धिकार्यं न कुत्रापि विहितम् | दिधीश्च वेवीश्च इट् च तेषामितरेतरद्वन्द्वः दीधीवेवीतः, तेषां

दीधीवेवीटाम् | दीधीवेवीटां षष्ट्यन्तं पदम्, एकपदमिदं सूत्रम् | **इको गुणवृद्धी** (१.१.३) इत्यस्मात् **गुणवृद्धी** इत्यस्य अनुवृत्तिः | **न धातुलोप आर्धधातुके** (१.१.४) इत्यस्मात् **न** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रं— **दीधीवेवीटाम् न गुणवृद्धी** |

**एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) = असंयोगपूर्व–अनेकाच्–इकारान्ताङ्गस्य यण्–आदेशो भवति अचि परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृश–धातुः यस्य अन्ते इकारः (न तु केवलं इकाररूप्यङ्गम्; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्त्यस्य अल्–वर्णस्य यणादेशः (न तु पूर्णाङ्गस्य) | न एकम्, अनेकम्, अनेके एकाचः यस्मिन् सः अनेकाच् नञ्तत्पुरुषगर्भो बहुव्रीहिः, तस्य अनेकाचः | नास्ति संयोगः पूर्वे यस्य स असंयोगपूर्वः बहुव्रीहिः, तस्य असंयोगपूर्वस्य | एः षष्ठ्यन्तम्, अनेकाचः षष्ठ्यन्तम्, असंयोगपूर्वस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **इणो यण्** (६.४.८१) इत्यस्मात् **यण्** इत्यस्य अनुवृत्तिः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्मात् **अचि**, **धातोः** (विपरिणामेन षष्ठ्यन्तम्) इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्तिसहित–सूत्रम्—**अनेकाचः असंयोगपूर्वस्य एः धातोः अङ्गस्य यण् अचि** |

**यीवर्णयोर्दीधीवेव्योः** (७.४.५३) = दीधी, वेवी इति धात्वोः अन्त्यवर्ण–इकारस्य लोपो भवति यकारादि–प्रत्यये इवर्णे च परे | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्त्यस्य अल्–वर्णस्य लोपः | यिश्च इवर्णश्च यीवर्णौ इतरेतरद्वन्द्वः, तयोः यीवर्णयोः | दीधीश्च वेवीश्च दीधीवेव्यौ इतरेतरद्वन्द्वः, तयोः दीधीवेव्योः | यीवर्णयोः सप्तम्यन्तं, दीधीवेव्योः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **तासस्त्योर्लोपः** (७.४.५०) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **दीधीवेव्योः अङ्गस्य लोपः यीवर्णयोः** |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

G. वेवीङ् वेतिना तुल्ये |

छान्दसि (वेदे) | आत्मनेपदिधातुः |

सर्वाणी सूत्राणि कार्याणि च दीधीङ्–धातोरिव |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

3. <u>उकारान्तधातवः ऊकारान्तधातवः च</u> (14 धातवः—कु, टुक्षु, क्ष्णु, णु, द्यु, यु, षु, ष्णु, ऊर्णु, रु, ह्नुङ्, ष्टुञ्, ब्रूञ्, षूङ्)

<u>A. सामान्याः उकारान्तधातवः</u> (9 धातवः—कु, टुक्षु, क्ष्णु, णु, द्यु, यु, षु, ष्णु, ह्नुङ्)

१) हलादि पित्सु = **उतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यनेन वृद्धि | यु + ति → य् + औ + ति → यौति
२) अजादि पित्सु = गुणः, अवादेशः (**एचोऽयवायावः**) | यु + आनि → यो + आनि → य् + अव् + आनि → यवानि
३) हलाद्यपित्सु = क्ङिति च, गुणनिषेधः | यु + तः → युतः

४) अजाद्यपित्सु = क्ङिति च, गुणनिषेधः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यनेन उवङ्–आदेशः | यु + अन्ति → युवन्ति

**उतो वृद्धिर्लुकि हलि** (७.३.८९) = लुकः विषये अनभ्यस्तस्य उदन्ताङ्गस्य वृद्धिः हलादि–पित्–सार्वधातुकप्रत्यये परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते उकारः (न तु केवलं उकाररूप्यङ्गम्); **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गान्तस्य उकारस्य स्थाने वृद्धि–आदेशः | उतः षष्ठ्यन्तं, वृद्धिः प्रथमन्तं, लुकि सप्तम्यन्तं, हलि सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) इत्यस्मात् **न**, **अभ्यस्तस्य**, **पिति**, **सार्वधातुके** इत्येषाम् अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **उतः अङ्गस्य वृद्धिः लुकि हलि पिति सार्वधातुके न अभ्यस्तस्य** |

यथा— यु + ति → कर्त्रर्थे सार्वधातुकप्रत्यये परे **कर्तरि शप्** → यु + शप् + ति → शपः लुक् **अदिप्रभृतिभ्यः शपः** → यु + ति → **उतो वृद्धिर्लुकि हलि** इत्यनेन वृद्धिः → य् + औ + ति → यौति

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

एवमेव अवशिष्टाः अष्टौ सामान्य–धातवः—
कु शब्दे → कौति, क्षु शब्दे → क्षौति, क्ष्णु तेजने → क्ष्णौति, णु स्तुतौ → नौति, द्यु अभिगमने → द्यौति, षुप्रसवैश्वर्योः → सौति, ष्णु प्रस्रवणे → स्नौति | ह्नु अपनयने, ङित्वात् आत्मनेपदे → ह्नुते |

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) = श्नुप्रत्ययान्ताङ्गस्य (स्वादिगणस्य अङ्गस्य यथा शक्नु, चिनु इत्यनयोः), इकारान्त–उकारान्तधातुरूपि–अङ्गस्य, भ्रू–प्रातिपदिकस्य च— एषाम् इकारस्य उकारस्य स्थाने क्रमेण इयङ् उवङ् च आदेशः भवति अजादि–प्रत्यये परे | श्नु–प्रसङ्गे **प्रत्ययग्रहणे तदन्ता ग्राह्याः** (परिभाषा #२३) इति परिभाषया तदन्तविधिः; अनेन यस्य अङ्गस्य अन्ते श्नु–प्रत्ययः स्यात्, तस्मात् इत्यर्थः | य्वोः इति विशेषणं "धातु" शब्दस्य एव यतोहि श्नुप्रत्ययान्ताङ्गम्, भ्रू प्रातिपदिकम् च उकारान्तः एव अतः तत्र इयङ् इत्यस्य प्रसक्तिः नास्ति | तर्हि 'धातु' इत्येव अवशिष्यते यस्य कृते य्वोः इति विशेषणं योग्यम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन यस्य धातोः अन्ते इकर–उकरः स्यात् इति अर्थः | श्नुश्च धातुश्च, भ्रूश्च तयोः इतरेतरद्वन्द्वः श्नुधातुभ्रुवः, तेषां श्नुधातुभ्रुवाम् | इश्च उश्च तयोः इतरेतरद्वन्द्वः यू, तयोः य्वोः | इयङ् च उवङ् च तयोः इतरेतरद्वन्द्वः, इयङुवङौ | अचि सप्तम्यन्तं, श्नुधातुभ्रुवां षष्ठ्यन्तं, य्वोः षष्ठ्यन्तम्, इयङुवङौ प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **य्वोः श्नुधातुभ्रुवाम् अङ्गानां इयङुवङौ अचि** |

B. ऊर्णुञ् आच्छादने इति धातुः

१) **ऊर्णोतेर्विभाषा** (७.३.९०) = ऊर्णु–धातोः उकारस्य विकल्पेन वृद्धिः हलादि–पिति प्रत्यये परे | ऊर्णु + ति → ऊर्णौति / ऊर्णोति |
अस्य अपवादः—
२) **गुणोऽपृक्ते** (७.३.९१) = ऊर्णु–धातोः उकारस्य गुणः एव भवति (न तु वृद्धिः) अपृक्ते हलादि–पित्–सार्वधातुकप्रत्यये परे | **अपृक्त एकाल् प्रत्ययः** (१.२.४१) इत्यनेन यस्मिन् प्रत्यये एक एव वर्णः (अल्), तस्य अपृक्त–संज्ञा भवति | हलादिपित्सु लङि त्, स् इति द्वौ प्रत्ययौ स्तः | अतः तयोः परयोः, केवलं गुणः भवति न तु वृद्धिः |
३) अन्यत् सर्वं यु–धातुरिव |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>

लटि —
लोटि—
लङि—
विधिलिङि—

**ऊर्णोतेर्विभाषा** (७.३.९०) = ऊर्णु–धातोः उकारस्य विकल्पेन वृद्धिः हलादि–पित्–सार्वधातुकप्रत्यये परे | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गान्तस्य वर्णस्य स्थाने वृद्धि–आदेशः | ऊर्णोतेः षष्ठ्यन्तं, विभाषा प्रथमान्तं, द्विपदमिदं सूत्रम् | **उतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यस्मात् **वृद्धिः**, **हलि** इत्यनयोः अनुवृत्तिः | **नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) इत्यस्मात् **पिति**, **सार्वधातुके** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ऊर्णोतेः अङ्गस्य विभाषा वृद्धिः हलि पिति सार्वधातुके** |

**अपृक्त एकाल् प्रत्ययः** (१.२.४१) = यस्य प्रत्ययस्य एकैव अल्, तस्य अपृक्त–संज्ञा भवति | एकश्चासौ अल् एकाल्, कर्मधारयः | अपृक्तः प्रथमान्तम्, एकाल् प्रथमान्तं, प्रत्ययः प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **एकाल् प्रत्ययः अपृक्तः** |

**गुणोऽपृक्ते** (७.३.९१) = ऊर्णु–धातोः उकारस्य गुणः एव भवति (न तु वृद्धिः) अपृक्ते हलादि–पित्–सार्वधातुकप्रत्यये परे | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गान्तस्य वर्णस्य स्थाने गुणादेशः | गुणः प्रथमान्तम्, अपृक्ते सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **उतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः | **नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) इत्यस्मात् **पिति**, **सार्वधातुके** इत्यनयोः अनुवृत्तिः | **ऊर्णोतेर्विभाषा** (७.३.९०) इत्यस्मात् **ऊर्णोतेः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ऊर्णोतेः अङ्गस्य गुणः हलि पिति अपृक्ते सार्वधातुके** |

C. रु शब्दे इति धातुः

**तुरुस्तुशम्यमः सार्वधातुके** (७.३.९५) = तु, रु, स्तु, शम्, अम् एभ्यः धातुभ्यः हलादि–सार्वधातुक–तिङ्प्रत्ययस्य विकल्पेन ईट्–आगमः भवति | प्रत्ययः पित् वा अपित् वा, हलादिः अस्ति चेत् ईडागमस्य विकल्पः |

१) ईडागमः नास्ति चेत् तर्हि यु–धातुरिव रूपाणि भवन्ति | रु + ति → रौति; रु + तः → रुतः; रु + अन्ति → रुवन्ति |
२) ईडागमः भवति चेत्—

रु + ति → रु + ईट् + ति → रु + ईति → ति हलादिः पित् आसीत् अतः **उतो वृद्धिर्लुकि हलि** इत्यनेन वृद्धिः भवति स्म | अधुना प्रत्ययः "ईति" जातः | अस्मिन् तिपः पित्त्वं तु अस्ति एव, परन्तु अजादिः जातः अतः ईति अजादि–पित् अस्ति | तर्हि अजादि–पितः सामान्यकार्यं भवति अत्र | रु + ईति → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → रो + ईति → **एचोऽयवायावः** इत्यनेन अव्–आदेशः → ‸ + अव् + ईति → रवीति

रु + तः → रु + ईट् + तः → रु + ईतः → तः हलाद्यपित् आसीत्; किन्तु अधुना ईतः अजाद्यपित् अस्ति | अजाद्यपित् अतः **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यनेन उवङ्–आदेशः →‸ + उव् + ईतः → रुवीतः

प्रत्ययः अजादिः अस्ति चेत् ईडागमः न भवति | यथा अजाद्यपित् 'अन्ति', अथवा अजादि–पित् 'आनि' इति |

रु + अन्ति → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यनेन उवङ्–आदेशः |‸ + उव् + अन्ति → रुवन्ति
रु + आनि → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → रो + आनि → **एचोऽयवायावः** इत्यनेन अव्–आदेशः →‸ + अव् + आनि → रवाणि

तर्हि सारांशः अत्र यत् तु, रु, स्तु, शम्, अम् इत्येषां धातूनां रूपाणि द्विविधा भवन्ति—ईडागमः अस्ति चेत्, अपि च ईडागमः नास्ति चेत् |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

ष्टुञ्–धातुः स्तुतौ अपि अदादौ; कार्यं तथैव—ईट्–अपक्षे यु–धातुवत् स्तौति, ईट्–पक्षे स्तवीति इत्यादीनि रूपाणि |
तु–धातुः सौत्रो धातुर्गतिवृद्धिइंसासु इति धातुपाठे नास्ति, किन्तु अदादिगणीयः इति मन्यन्ते | रूपाणि रु–धातुवत्, तौति, तवीति इत्यादिकम् |

**तुरुस्तुशम्यमः सार्वधातुके** (७.३.९५) = तु, रु, स्तु, शम्, अम् एभ्यः धातुभ्यः हलादि–सार्वधातुक–तिङ्प्रत्ययस्य विकल्पेन ईट्–आगमो भवति | तुश्च रुश्च स्तुश्च शमिश्च आम् च तेषां समाहारद्वन्द्वः तुरुस्तुशम्यम्, तस्मात् तुरुस्तुशम्यमः | तुरुस्तुशम्यमः पञ्चम्यन्तं, सार्वधातुके सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **उतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः | **भूसुवोस्तिङि** (७.३.८८) इत्यस्मात् **तिङि** इत्यस्य अनुवृत्तिः; **ब्रुव ईट्** (७.३.९३) इत्यस्मात् **ईट्** इत्यस्य अनुवृत्तिः; **यङो वा** (७.३.९४) इत्यस्मात् **वा** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **तुरुस्तुशम्यमः अङ्गात् ईट् वा हलि सार्वधातुके तिङि** |

D. ह्नुङ् अपनयने इति धातुः

ङित् अस्ति अतः आत्मनेपदिधातुः | अन्यत् सर्वं सामान्यमेव |
१) हलादि पित्सु = आत्मनेपदिधातुषु नास्ति एव |
२) अजादि पित्सु = गुणः, अवादेशः | ह्नु + ऐ → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → ह्नो + ऐ → **एचोऽयवायावः** इत्यनेन अव्–आदेशः → ह्न् + अव् + ऐ → ह्नवै
३) हलाद्यपित्सु = क्ङिति च, गुणनिषेधः | ह्नु + ते → ह्नुते
४) अजाद्यपित्सु = क्ङिति च, गुणनिषेधः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यनेन उवङ्–आदेशः | ह्नु + आते → ह्न् + उव् + आते → ह्नुवाते

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

E. ब्रूञ्–व्यक्तायां वाचि इति धातुः

ञित् अस्ति अतः उभयपदिधातुः |

**ब्रुव ईट्** (७.३.९३) = हलादि–पिति एव ईट्–आगमः भवति | ब्रू + ति → ब्रू + ईट् + ति → ब्रू + ईति → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → ब्रो + ईति → **एचोऽयवायावः** इत्यनेन अव्–आदेशः → ब्र् + अव् + ईति → ब्रवीति
हलादि–पितः एते—ति, सि, मि, तु, त्, स् | अतः ब्रवीति, ब्रवीषि, ब्रवीमि, ब्रवीतु, अब्रवीत्, अब्रवीः |

**ब्रुवः पञ्चानामादित आहो ब्रुवः** (३.४.८४) = परस्मैपदस्य लट्–लकारे, ब्रू–धातुतः प्रथम–पञ्चानां तिङ्प्रत्ययानां, क्रमेण तिप्, तस्, झि, सिप्, थस् इत्येषां स्थाने णल्, अतुस्, उस्, थल्, अथुस् इति आदेशाः विकल्पेन भवन्ति अपि च अस्मिन् पक्षे सति, ब्रू–धातोः स्थाने आह् इति धात्वादेशो भवति |

ब्रू + ति → आह् + णल् → आह् + अ → आह
ब्रू + तः → आह् + अतुस् → आह् + अतुः → आहतुः
ब्रू + अन्ति → आह् + उस् → आह् + उः → आहुः
ब्रू + थः → आह् + अथुस् → आह् + अथुः → आहथुः
ब्रू + सि → आह् + थल् → आह् + थ → **आहस्थः** (८.२.३५) इत्यनेन आह् इत्यस्य हकारस्य स्थाने थकारादेशः भवति झलि परे; थकारः झल्–प्रत्याहारे अस्ति अतः ह्–स्थाने थकारादेशः → आथ् + थ → **खरि च** (८.४.५५) इति चर्त्वसन्धिविधायकसूत्रेण खरि परे झलां चरः स्युः, थ्–स्थाने तकारः → आत् + थ → आत्थ

अवशिष्टेषु रूपेषु न धात्वादेशः, न वा तिङ्प्रत्ययादेशः | अतः यथासामान्यम्—
१) हलादि पित्सु = **ब्रुव ईट्** (७.३.९३) इत्यनेन ईट्–आगमः भवति | ब्रू + ति → ब्रू + ईट् + ति → ब्रू + ईति → ब्रो + ईति → ब्र् + अव् + ईति → ब्रवीति
२) अजादि पित्सु = गुणः, अवादेशः (**एचोऽयवायावः**) | ब्रू + आनि → ब्रो + आनि → ब्र् + अव् + आनि → ब्रवाणि
३) हलाद्यपित्सु = क्ङिति च, गुणनिषेधः | ब्रू + तः → ब्रूतः
४) अजाद्यपित्सु = क्ङिति च, गुणनिषेधः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यनेन उवङ्–आदेशः | ब्रू + अन्ति → ब्र् + उव् + अन्ति → ब्रुवन्ति

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

आत्मनेपदे पूर्णतया ह्नु–धातुवत्

**ब्रुव ईट्** (७.३.९३) = ब्रू–धातुतः हलादि–पित्–प्रत्ययस्य ईट्–आगमो भवति | ब्रुवः पञ्चम्यन्तम्, ईट् प्रथमान्तं, द्विपदमिदं सूत्रम् | **उतो वृद्धिर्लुकि हलि** (७.३.८९) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः | **नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) इत्यस्मात् **पिति**, **सार्वधातुके** इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ब्रुव अङ्गात् ईट् हलि पिति सार्वधातुके** |

**ब्रुवः पञ्चानामादित आहो ब्रुवः** (३.४.८४) = परस्मैपदस्य लट्–लकारे, ब्रू–धातुतः प्रथम–पञ्चानां तिङ्प्रत्ययानां, क्रमेण तिप्, तस्, झि, सिप्, थस् इत्येषां स्थाने णल्, अतुस्, उस्, थल्, अथुस् इति आदेशाः विकल्पेन भवन्ति अपि च अस्मिन् पक्षे सति, ब्रू–धातोः स्थाने आह् इति धात्वादेशो भवति | ब्रुवः पञ्चम्यन्तं, पञ्चानां षष्ठ्यन्तम्, आदितः अव्ययपदम्, आहः प्रथमान्तं, ब्रुवः षष्ठ्यन्तम्, अनेकपदमिदं सूत्रम् | **विदो लटो वा** (३.४.८३) इत्यस्मात् **लटः**, **वा** इत्यनयोः अनुवृत्तिः | **परस्मैपदानां णलतुसुस्थलथुसणल्वमाः** (३.४.८२) इत्यस्मात् **परस्मैपदानां**, **णलतुसुस्थलथुसः** इत्यनयोः अनुवृत्तिः | **प्रत्ययः** (३.१.१), **परश्च** (३.१.२), **धातोः** (३.१.९१), **लस्य** (३.४.७७ ) इत्येषाम् अधिकारः | अनुवृत्ति–सहितसूत्रम्— **ब्रुवः धातोः लस्य लटः परस्मैपदानां पञ्चानाम् आदितः णलतुसुस्थलथुसः प्रत्ययः परश्च वा ब्रुवः आहः** |

**आहस्थः** (८.२.३५) = आह् इत्यस्य हकारस्य स्थाने थकारादेशो भवति झलि परे | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन आह्–धातोः अन्तिमवर्णस्य हकारस्य स्थाने थकारः | आहः षष्ठ्यन्तं, थः प्रथमान्तं, द्विपदमिदं सीत्रम् | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **आहः थः झलि** |

F. षूङ् प्राणि–गर्भविमोचने (सू–धातुः)

**भूसुवोस्तिङि** (७.३.८८) = भू सू इति धातुभ्यां सार्वधातुके तिङ्प्रत्यये परे गुणनिषेधः भवति | भू–धातुः भ्वादिगणे, यथा लुङ्–लकारे भू–धातोः परे तिङ् साक्षात् आयाति | तत्र इकः गुणः भवति स्म, परन्तु अनेन सूत्रेण गुणनिषेधः, अभूत् इति रूपम् | सू–धातुः अदादिगणे; अनेन सूत्रेण पिति परे अपि गुणः न | भूश्च सूश्च भूसुवौ इतरेतरद्वन्द्वः, तयोः भूसुवोः | भूसुवोः षष्ठ्यन्तं, तिङि सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) इत्यस्मात् **न**, **सार्वधातुके** इत्यनयोः अनुवृत्तिः | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **भूसुवोः न गुणः सार्वधातुके तिङि** |

षूङ्–धातुः ङित् अतः आत्मनेपदी—
१) हलादि पित्सु = आत्मनेपदिधातुषु नास्ति एव |
२) अजादि पित्सु = **भूसुवोस्तिङि** (७.३.८८) इत्यनेन गुणनिषेदः | अतः **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यनेन उवङ्–आदेशः | सू + ऐ → स् + उव् + ऐ → सुवै
३) हलाद्यपित्सु = क्ङिति च, गुणनिषेधः | सू + ते → सूते
४) अजाद्यपित्सु = क्ङिति च, गुणनिषेधः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यनेन उवङ्–आदेशः | सू + आते → स् + उव् + आते → सुवाते

अपित्सु प्रत्ययेषु **सार्वधातुकमपित्** (१.२.४), **क्क्ङिति च** (१.१.५) इति सूत्राभ्यां गुणनिषेधः भवति स्म, किन्तु विशेषत्वात् प्रतिपदोक्तत्वात् **भूसुवोस्तिङि** (७.३.८८) इत्यनेन एव गुणनिषेधः भवति |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>4. ऋकारान्तधातवः (1 धातुः—जागृ निद्राक्षये)</u>

<u>जागृ धातुः</u>

**जक्षित्यादयः षट्** (६.१.६) = जागृ–आदयः षट् धातवः, सप्तमश्च जक्ष् इत्येषाम् अभ्यस्त–संज्ञा भवति | अदादिगणे एकः अन्तर्गणः वर्तते यस्मिन् सप्त धातवः सन्ति— जक्ष्, जागृ, दरिद्रा, चकास्, शास्, दीधीङ्, वेवीङ् | धातोः द्वित्वं यदा भवति, तदा मिलित्वा द्वयोः नाम अभ्यस्तम् | किन्तु अनेन सूत्रेण एषां धातूनाम् अभ्यस्तसंज्ञा भवति, द्वित्वं विना | षड्धातवोऽन्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञाः स्युः | इति आदिः येषां ते इत्यादयः | इतिशब्देन जक्ष्–परामर्शः | जक्ष् प्रथमान्तम्, इत्यादयः प्रथमान्तम्, षट् प्रथमान्तम्, त्रिपदमिदं सूत्रम् | **उभे अभ्यस्तम्** (६.१.५) इत्यस्मात् **अभ्यस्तम्** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **जक्षित्यादयः षट् अभ्यस्तम्** |

तिङ्प्रत्ययानां सिद्ध्यर्थं विशेषकार्यद्वयम्—

१) **अदभ्यस्तात्** (७.१.४) = अभ्यस्तसंज्ञक–धातूत्तरस्य प्रत्ययस्य आदिमावयवस्य झकारस्य स्थाने अत्–आदेशो भवति | अत् प्रथमान्तम्, अभ्यस्तात् पञ्चम्यन्तं, द्विपदमिदं सूत्रम् | **झोऽन्तः** (७.१.३) इत्यस्मात् **झः** (षष्ठ्यन्तम्) इत्यस्य अनुवृत्तिः | **आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्** (७.१.२) इत्यस्मात्, वचनपरिणामं कृत्वा **प्रत्ययादेः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम् — **अभ्यस्तात् अङ्गात् प्रत्ययादेः झः अत्** |

२) **सिजभ्यस्तविदिभ्यश्च** (३.४.१०९) = ङित्–लकारस्य अवस्थायां, सिच्–प्रत्ययात्, अभ्यस्तसंज्ञकात् धातोः, विद्–धातोः च, परस्य झि–प्रत्ययस्य स्थाने जुस्–आदेशो भवति | सिच् च अभ्यस्तश्च विदिश्च तेषामितरेतरद्वन्द्वः सिजभ्यस्तविदयः, तेभ्यः सिजभ्यस्तविदिभ्यः | सिजभ्यस्तविदिभ्यः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **नित्यं ङितः** (३.४.९९) इत्यस्मात् **ङितः** इत्यस्य अनुवृत्तिः | **झेर्जुस्** (३.४.१०८) इत्यस्मात् **झेः जुस्** इत्यनयोः अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्—

**सिजभ्यस्तविदिभ्यः च ङितः लस्य झेः जुस् |**

तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनम्—

१) हलादि पित्सु = गुणः | ऋ → अ्र् | जागृ + ति → जागर् + ति → जागर्ति
२) अजादि पित्सु = गुणः | जागृ + आनि → जागर् + आनि → जागराणि
३) हलाद्यपित्सु = क्ङिति च, गुणनिषेदः | जागृ + तः → जागृतः
४) अजाद्यपित्सु = क्ङिति च, गुणनिषेधः | **इको यणचि** इत्यनेन यणादेशः | जागृ + अति → जाग्र् + अति → जाग्रति

लङि विशिष्टं कार्यद्वयम्—
१) अजागृ + त् → गुणः → अजागर् + त् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** इत्यनेन त्–लोपः → अजागर् →
**खरवासयोर्विसर्जनीयः** इत्यनेन‸–स्थाने विसर्गः → अजागः
अजागृ + स् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** इत्यनेन स्–लोपः → अजागर् → **खरवासयोर्विसर्जनीयः** इत्यनेन‸–स्थाने विसर्गः → अजागः
२) अजागृ + जुस् → अजागृ + उः → **जुसि च** इत्यनेन गुणः → अजागर् + उः → अजागरुः

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) इत्यनेन लङ्–लकारे प्रथमपुरुषे अपृक्तसंज्ञकस्य त्–प्रत्ययस्य लोपः, तथैव च मध्यमपुरुषे स्–प्रत्ययस्य लोपः |

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) = हलन्तात्, दीर्घङ्यन्तात्, दीर्घाबन्तात् च सु–ति–सि इत्येषाम् अपृक्तसंज्ञकस्य हलः लोपः | अनेन प्रथमाविभक्तौ सु इत्यस्य स्–लोपः, लङि प्रथमपुरुषे त्–लोपः, मध्यमपुरुषे स्–लोपश्च | हल् च ङी च आप् च तेषाम् इतरेतरद्वन्द्वः हल्ङ्यापः, तेभ्यः हल्ङ्याब्भ्यः | सुश्च, तिश्च, सिश्च तेषां समाहारद्वन्द्वः, सुतिसि, सुतिसिनः अपृक्तं सुतिस्यपृक्तम् | हल्ङ्याब्भ्यः पञ्चम्यन्तं, दीर्घात् पञ्चम्यन्तं, सुतिस्यपृक्तं प्रथमान्तं, हल् प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **लोपो व्योर्वलि** (६.१.६५) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः; अत्र कर्मणि प्रयोगे **लुप्यते** इति रूपविकारः | अनुवृत्ति–सहितसूत्रम्— **दीर्घात् हल्ङ्याब्भ्यो सुतिसि अपृक्तं हल् लुप्यते |**

**खरवसानयोर्विसर्जनीयः** (८.३.१५) = पदान्ते स्थितस्य रेफस्य स्थाने विसर्गादिशो भवति खरि अवसाने च परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन रेफान्तस्य पदस्य; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन पदान्तस्य रेफस्य स्थाने विसर्गादिशः | खर् च अवसानं च तयोरितरेतरयोगद्वन्द्वः खरवसाने, तयोः खरवसानयोः | खरवसानयोः सप्तम्यन्तं, विसर्जनीयः प्रथमान्तं, द्विपदमिदं सूत्रम् | **रो रि** (८.३.१४) इत्यस्मात् **रः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **रः पदस्य विसर्जनीयः खरवसानयोः संहितायाम् |**

अजागृ + स् → अजागः

**जुसि च** (७.३.८३) = अजादौ जुसि परे इगन्ताङ्गस्य गुणः भवति | जुसि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन इगन्तस्य अङ्गस्य; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गान्तस्य इकः स्थाने गुणादेशः | **क्सस्याचि** (७.३.७२) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः | **मिदेर्गुणः** (७.३.८२) त्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इति परिभाषासूत्रेण **इकः** स्थानी भवति | अनुवृत्ति–सहितसूत्रम्— **इकः अङ्गस्य गुणः अचि जुसि च |**

गुणकार्ये विशेषः—

**जाग्रोऽविचिण्णल्ङित्सु** (७.३.८५) = जागृ–धातोः गुणो भवति वि, चिण्, णल्, ङित् इत्येषां प्रत्यययाणां पर्युदासे | वि इति प्रत्ययविशेषः, चिण् इति लुङ्–लकारस्य, णल् इति लिट्–लकारस्य, ङित् इत्यनेन इत्–संज्ञकः ङकारः यस्य | वि, ङित् इत्यनयोः विषये गुणनिषेधः इदानीमपि भवति | चिण्, णल् इत्यनयोः विषये वृद्धिः इदानीमपि भवति | अन्यत्र सर्वत्र गुणः भवति एव | **अचो ञ्णिति** (७.२.११५), **क्ङिति च** (१.१.५) इत्यनयोः अपवादः | विश्च चिण् च णल् च ङित् च, तेषामितरेतरद्वन्द्वः विचिण्णल्ङितः, न विचिण्णल्ङितः

अविचिण्णल्ङितः, तेषु अविचिण्णल्ङित्सु | जाग्रः षष्ठ्यन्तम्, अविचिण्णल्ङित्सु सप्तम्यन्तम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **जाग्रः गुणः अविचिण्णल्ङित्सु** |

यत्र वृद्धिः भवति स्म, तत्र गुणः भवति—

जागृ + णिच् → **अचो ञ्णिति** (७.२.११५) इति प्रबाध्य **जाग्रोऽविचिण्णल्ङित्सु** (७.३.८५) इत्यनेन गुणः → जागर् + इ → जागरि इति णिजन्तधातुः → जागरयति

यत्र कित्त्वात् गुणनिषेधः भवति स्म, तत्र गुणः भवति—

जागृ + क्त → **क्क्ङिति च** (१.१.५) इति प्रबाध्य **जाग्रोऽविचिण्णल्ङित्सु** (७.३.८५) इत्यनेन गुणः → जागर् + क्त → **आर्धधातुकस्येड्वलादेः** (७.२.३५) इत्यनेन आर्धधतुक-प्रत्ययस्य आदौ वल्-प्रत्याहारे अन्यतमवर्णः अस्ति चेत्, तस्य इडागमो भवति → जागर् + इ + त → जागरितः

यत्र **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणः भवति स्म, तत्र **जाग्रोऽविचिण्णल्ङित्सु** (७.३.८५) इत्यनेन एव गुणः भवति प्रतिपदोक्तत्वात्—

जागृ + ति → **सार्वधातुकार्धधातुकयोः** (७.२.११५) इति प्रबाध्य **जाग्रोऽविचिण्णल्ङित्सु** (७.३.८५) इत्यनेन गुणः → जागर् + ति → जागर्ति

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

अनेन अदादिगणस्य अजन्तधातवः समाप्ताः |

Swarup – August 2013 (Updated March 2016)